सप्तशती पूजा पद्धति

डा० वी० के० शर्मा भारतीय

गुरु भारतीय आश्रम

गोदानिकुन्ज, सी-1065, सेक्टर-बी,

महानगर, लखनऊ-226006

दादा गुरुजी श्री 108 स्वामी ओंकारानंद महाराज

सप्तशती पूजा पद्धति

त्रिपुरेश्वरी शक्तिपीठ
गुरु भारतीय आश्रम
गोदानिकुन्ज, सी-1065, सेक्टर-बी,
महानगर, लखनऊ (उ०प्र०) 226 006

सप्तशती पूजा पद्धति

संकलनकर्ता :

डा० वी० के० शर्मा भारतीय

प्रकाशक :

त्रिपुरेश्वरी शक्तिपीठ
गुरु भारतीय आश्रम
गोदानिकुन्ज, सी-1065, सेक्टर-बी,
महानगर, लखनऊ

सहयोग राशि 100/- रुपया

मुद्रक :

साहू प्रिन्टिंग प्रेस
168/32, नाज सिनेमा रोड,
पुराना नजीराबाद, लखनऊ-18

जैं का एक कटाक्ष मा प्रलय और उत्पत्ति संसार की।
ज्या ब्रह्मादिक वन्दनी भगवती ज्या बीज ओंकार की।।
मार्‍या शुम्भ निशुम्भ जैन पलमा संसार बाधा हरी,
स्या देवी दुःख विघ्नभंजन कर्‍यान् संसार मातेश्वरी।।

स्व० श्रीमती शकुन्तला देवी गुप्ता धर्मपत्नी श्री रमेश चन्द्र गुप्ता
अध्यापक, निवासी 103 रूहाई, औरैया

गुरूदेव द्वारा आशीष प्राप्त करते हुए (पुत्र डा. वी. के. शर्मा)

गुरू के चरणों में डा. वी. के. शर्मा

विषय सूची

दो शब्द

जय माँ जय गुरुदेव

आत्मप्रिय साधकगण सप्तसती पूजा पद्धति पुस्तक आपको हस्तगत कराते अपार प्रसन्नता हो रही है।

हमारी दैनन्दिन पूजा के क्रम में कुछ विशिष्ट पूजा पद्धतियाँ इसमें समाहित की गई हैं। पूज्य पाद गुरुदेव डा. भारतीय द्वारा पूर्व में सम्पादित लघु पूजा पद्धति को यथावत प्रकाशित किया जा रहा है। इस पुनीत कार्य को स्वर्गीय श्रीमती शकुन्तला देवी गुप्ता की पवन स्मृति में उनके पति श्री रमेश चन्द्र गुप्ता अध्यापक, निवासी 103 रुहाई, औरया ने प्रकाशित कराने का व्यय भार उठाया है। अध्य शक्ति इनका तथा स्वजनों सहित मंगल करे श्रद्धेय गुरुदेव भारती जी कृपा इनके जीवन को सुखी व सम्पन्न रखे।

आशा है आप सभी लोग यदि इससे किंचित भी लाभान्वित होंगे तो हमारा प्रयास सफल होगा।

डा. वी.के. शर्मा
(पीठाचार्य त्रिपुरेश्वरी शक्तिपीठ)
गोदानिकुंज, C-1065 सेक्टर-बी,
महानगर, लखनऊ

दुर्गापूजनम्

स्वस्तिवाचनम्

ॐ स्वस्ति नऽइन्द्रोव्वृद्धश्रवाः स्वस्ति नः पूषा विश्श्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।। ॐ पयः पृथिव्व्यां पयऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।। ॐ व्विष्णोरराटमसि व्विष्ष्णोःश्नप्त्रेस्त्थो व्विष्णोःस्यूरसि विष्णोर्द्ध्रुवोसि। व्वैष्णवमसि व्विष्णवे त्वा।। ॐ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रादेवताऽऽदित्या देवता मरुतो देवता। व्विश्वेदेवादेवता बृहस्पतिर्देवतेन्द्रो देवताव्वरुणो देवता।। ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।। ॐ व्विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव।। सुशान्तिर्भवतु।।

शुक्लाम्बरधर विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजय।
मेषामिन्दीवरस्यामो हृदयस्थो जनार्दनः।।

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।

रुद्राय रौद्ररूपाय रणताण्डव शालिने।
राज्योपद्रवनाशाय राज्यशान्ति विधायिने।।
सङ्कटत्राणकर्त्रे च सर्वसन्तापहारिणे।
महाविघ्नविनाशाय वटुकाय नमो नमः।।

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते।।

आसन पर पूर्वाभिमुख बैठकर बायीं ओर घंटा और दाहिनी ओर शंख तथा पूजन सामग्री रखकर, आचमन, प्राणायाम करके पूजन करें।

जलशोधन

ॐ गंगे च यमुने चैव, गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि, जलेऽस्मिन् सन्निधिं कुरु।।
पुष्कराद्यानि तीर्थानि, गंगाद्याः सरितस्तथा।
आयान्तु मम रक्षार्थं, दुरितक्षय कारकाः।।

ॐ दशकलात्मने धर्म्मप्रदवह्निनामण्डलाय नमः।
ॐ द्वादशकलात्मने अर्थप्रदाय सूर्यमण्डलाय नमः।
ॐ षोडशकलात्मने कामप्रदाय चन्द्रमण्डलाय नमः।
ॐ सं सत्त्वाय नमः ॐ रं रजसे नमः। ॐ तमसे नमः।

ॐ भूर्भुवः स्वः गङ्गादिसप्तसरित इहागच्छत सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि। पाद्यानि समर्पयामि। श्री गङ्गादिसरिद्भ्यो नमः। श्री प्रयागादितीर्थेभ्यो नमः। ॐ सर्ववाद्यमयीघण्टायै नमः। ॐ गन्धर्वदेवाय धूपपात्राय नमः। ॐ वह्निदैवत्याय दीपपात्राय नमः।।

शरीरपवित्रकरणार्थे

ॐ विष्णुर्विष्णुर्हरिर्हरिरिति त्रिराचम्य सिद्धं, ॐ अपवित्रः पवित्रो वा, सर्वावस्थां गतोऽपि वा। यः स्मेरत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।।

अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे।।

ॐ अपसर्यन्तु ते भूता, ये भूता भुवि संस्थिताः।
यू भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।।

ॐ अस्य श्रीआसनमन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलंछदः,
कूर्मोदेवता, आसनोपवेशनेविनियोगः।

भूमौ

ॐ मही द्यौः पृथिवी च न ऽइमं यज्ञम्मिमिक्षताम्। पिपृतान्नो भरीमभिः।।

ॐ भूर्भुवः स्वः पृथ्वि। इहागच्छेह तिष्ठ। पाद्यादीनि समर्प्पयामि।
गंधाक्षतपुष्पाणि समर्पयामि।। ॐ पृथ्वीदेव्यै नमः।
ॐ पृथ्वित्वया धृतालोका, देवि त्वं विष्णुनाधृता। त्वञ्चधारय मां भद्रे पवित्रं कुरुचासनम्।। पृथ्वीदेव्यै नमः, कूर्मासनाय नमः, नागासनाय नमः, शेषासनाय नमः, शक्तिपीठाय नमः, कुण्डलिन्यै नमोनमः।।

आचमनीयम्

ॐ केशवाय नमः स्वाहा। ॐ नारायणाय नमः स्वाहा। ॐ माधवाय नमः स्वाहा। (ॐ अच्युताय नमः। ॐ हृषीकेशाय नमः)

ॐ ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा।
ॐ ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा।
ॐ क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा।
ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा।।

।। हस्तौप्रक्षाल्य।।

ॐ सिद्धम् - ॐ सिद्धम् - ॐ सिद्धम्। ॐ नमो भगवते वासुदेवाय।।

ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते।
तिष्ठ देवि शिखाबन्धे, तेजोवृद्धिं कुरुष्व मे।।

घण्टा पूजन

वामतो घण्टां स्थापयेत्-पाद्यादीनि समर्प्पयामि, गन्धाक्षतपुष्पाणि समर्प्पयामि
ॐ आगमार्थञ्च देवानां, निर्गमार्थञ्च रक्षसाम्।
सर्वभूतहितार्थाय घण्टानादं करोम्यहम्।।

पाञ्चजन्य (शंख पूजन)

दक्षिणपार्श्वे गन्धाक्षतपुष्पैः पूजयित्वा जलेनापूर्य

ॐ पाञ्चजन्याय विद्महे, पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात्।

आदित्यं गणनाथं च देवी रुद्रं च केशवम्।

पंचदैवतभित्युक्तं सर्वकर्मसु पूजयेत्।।

दीप पूजन

'ॐ दीपनाथ भैरवाय नमः' 'सम्पूज्य' पाद्यादीनि समर्प्पयामि, गंधाक्षतपुष्पाणि समर्प्पयामि, ॐ दीपनाथ भैरवाय नमः, ॐ करकलितकपालः कुण्डलीदण्ड-पाणिस्तरुणमितिर नीलव्यालयज्ञोपवीती। क्रतुसमयसपर्या विघ्न विच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम्।। पुनः दीपं सम्प्रार्थ्य- गंधाक्षतपुष्पाणि समर्पयामि। ॐ दिवाकराय नमः।

भो दीप देवरूपस्त्वं कर्मसाक्षि ह्यविघ्नकृत्।

यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव।।

ध्येयः सदा सवितृमण्डलमध्यवर्ती, नारायणः सरसिजासनसन्निविष्टः।

केयूरवान्मकरकुण्डलवान्किरीटी, हारी हिरण्मयवपुर्धृत शंखचक्रः।।

सूर्यमावाहयेत् - आवाहयेत्तं द्विभुजं दिनेशं, सप्ताश्ववाहं द्युमणिं ग्रहेशम्।

सिन्दूरवर्णप्रतिभावभासं, भजामि सूर्यं कुलवृद्धिहेतोः।।

ॐ भूर्भुवः स्वः। भो सूर्यदेव। इहागच्छ, स्थाने चात्र स्थिरो भव।

यावत्पूजां करिष्यामि, तावत्त्वं सन्निधो भव।।

ब्राह्मण पूजनम्

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

यदर्चनं कृतं विप्र तव विष्णुस्वरूपिणम्।
प्रार्थना मम दीनस्य विष्णवे तु समर्पणम्।।

ब्राह्मण के हाथ में दक्षिणा देकर रक्षा बांधें-

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽप्नोति दक्षिणाम्।
दक्षिणाश्रद्धामाप्नोति श्रद्धयां सत्यमाप्यते।।

संकल्प

ॐ अद्य **शरत्कालिक** दुर्गा पूजनपूर्वकं श्रीमार्कण्डेयपुराणोक्त चण्डी सप्तशतीपाठकरणार्थ अमुकगोत्रममुकशर्माणं ब्रह्मणं त्वामहं वृणे।
'ॐ वृतोऽस्मीति' प्रतिवचनम्।

(दांये हाथ में जल, गन्ध, पुष्प, सुपारी, पीले चावल एवं दक्षिणा लेकर)

'ॐ विष्णुः विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोः आज्ञया प्रवर्तमानस्य अद्य श्री **ब्रह्मणोऽह्नि द्वितीये प्रहरार्धे** श्रीश्वेतवाराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे कलि-प्रथमचरणे जन्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तान्तर्गते अमुक स्थाने अमुक संवत्सरे मासानां अमुक मासोत्तमेमासे अमुक पक्षे अमुक वासरे अमुक नक्षत्रे, श्रीमत् शालिवाहन शाके अद्य अमुकं राशि स्थिते श्री सूर्य, चन्द्रे, भौमे, बृहस्पतौ, शुक्रे, शनौ, राहौ, केतौ एवं ग्रहगुण विशेषेणे विशिष्टायां शुभपुण्य तिथौ अमुक गोत्रोत्पन्नोहम् अमुकोऽहम् आत्मनः कायिक वाचिक मानसिक सकल पाप क्षयार्थे धर्मार्थ काम मोक्षार्थे श्रुति-स्मृति-पुराणोक्त फल प्राप्त्यर्थं सर्वापच्छान्तिपूर्वकं दीर्घायुः विपुल धनधान्य पुत्र-पौत्रादि अविछिन्न सन्ततिवृद्धि-स्थिर-लक्ष्मी कीर्तिलाभ-शत्रु पराजय चतुर्विध पुरुषार्थ सिद्ध्यर्थं, मनोकामना सिद्धयर्थम्-सभायां राजद्वारे सर्वत्र यशोविजयादि लाभ प्राप्त्यर्थं सर्वदोषाणां शान्त्यर्थम् सुख सौभाग्य आयुरारोग्य वर्धनार्थं कल्याणार्थे श्री दुर्गापूजनं हवनं च अहं करिष्ये।

रक्षा-विधानम्

बायें हाथ में पीली सरसों, चावल, पुष्प, सुपारी और तीन तार की मौली लेकर दाहिने हाथ से ढककर नीचे मंत्र बोलें-

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम्।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम्।।
स्थानाधिपं नमस्कृत्य ग्रहनाथं **निशाकम्**।
धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम्।
दैत्याचार्य नमस्कृत्य सूर्यपुत्रं महाग्रहम्।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः।।
शक्राधा देवताः सर्वाः मुनीश्चैव तपोधनान्।
गर्ग मुनिं नमस्कृत्य नारदं मुनिसत्तमम्।।
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्।
व्यासं मुनिं नमस्कृत्य सर्वशास्त्र विशारदम्।।
विद्याधिका ये मुनयः आचार्यश्च तपोधनाः।
तान् सर्वान् **प्रणमाम्येवं** यज्ञरक्षाकरान् सदा।।

नीचे लिखे मंत्रों से दशो दिशाओं में पीली सरसों छोड़ें -

पूर्वे रक्षतु वाराहः आग्नेय्यां गरुडध्वजः।
दक्षिणे पद्मनाभस्तु नैऋत्यां मधुसूदनः।।
पश्चिमे चैव गोविन्दो वायव्यां तु जनार्दन।
उत्तरे श्रीपती रक्षेत् ईशाने तु महेश्वरः।।
ऊर्ध्वं रक्षतु **धाता वाह्य-धोऽनन्तश्च** रक्षतु।
एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः।।

रक्षाहीनन्तु यत्स्थानं रक्षत्वीशो ममाद्रिधृक्।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।।

स्थानं त्यक्त्वा तु तत्सर्व यत्रस्थं तत्र गच्छतु।
अपक्रामन्तु ते भूता ये भूता भूतले स्थिताः।।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।।
सर्वेषामविरोधेन पूजाकर्म समारभे।।

मौली को गणेशजी के पास रखें, सभी देवताओं को चढ़ाकर रक्षाबन्धन करें।

यजमान तिलक

ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मी प्रसीदतु।
रक्षन्तु त्वां सुराः सर्वे सम्पदः सन्तु सुस्थिरा।।

पुरुष

शतमानं भवति शतयुर्वे पुरुष। शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धन्ते।।
धन्यं धनं पशु बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः।।

सौभाग्यवती स्त्री

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणाभुम्मइषाण सर्वलोकम्मइषाण।।
आयुष्मती सौभाग्यवती धनवती पुत्रवती **जीववत्साभव**।।

विधवायाः

तद्विष्णोः परमम्पदं ॐ सदा पश्यन्ति सूरयः। दिवीव चक्षुरांतत्तम्।। त्रीणि यदा विचक्रमे विष्णु गोयाऽअदानब्म्यः। अतो धर्माणि धारयान विष्णुव्रतवती भव।।

बालकस्य

यावद्गङ्गा कुरुक्षेत्रे यावत्तिष्ठति मेदिनी।
यावद्रामकथा लोके तावज्जीवतु बालकः।। **दीर्घायुर्भव**।।

कन्यायाः

ॐ अम्बे अम्बिकेऽम्बालिके न मानयति कश्चन।
ससत्यश्श्रवकः शुभद्रिकाङ्काम्पीलवासिनीम्।। **दीर्घायुषीभव**।।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोध्पह्वये श्रियम्।।

यजमान-रक्षाबन्धन मन्त्र

ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वामभिवबध्नामि रक्षे मा चल मा चल।।

ॐ त्वं यविष्ठ दाशुषोन्नॄँ ॐ पाहिश्रृणुधीगिरः रक्षातोकमुतत्मना।।
इति रक्षाबन्धनम्।।

स्वस्तिवाचनम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।।

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभः।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।

गणपति पूजन

(दुर्वा-अक्षत-पुष्प हाथ में लेकर) -

ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे सङ्कटे चैव विघ्नतस्य न जायते।।
विघ्नवल्ली कुठाराय श्रीमन् गणाधिपतये नमः।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।
वक्रतुण्ड महाकाय सूर्यकोटि समप्रभं।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते।।

ॐ श्रीमन्महागणाधिपतये नमः। ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः। ॐ वाणीहिरण्यगर्भाभ्यां नमः। ॐ शचीपुरन्दराभ्यां नमः। ॐ मातापितृचरण-कमलेभ्यो नमः। इष्टदेवताभ्यो नमः। ॐ कुलदेवताभ्यो नमः। ॐ ग्रामदेवताभ्यो नमः। ॐ वास्तुदेवताभ्यो नमः। ॐ स्थानदेवताभ्योनमः। एतत्कर्म प्रधान देवताभ्यो नमः। सर्वेभ्योदेवेभ्यो नमः। सर्वेभ्योब्राह्मणेभ्यो नमः। अविघ्नमस्तु।।

ॐ मनो जूतीर्ज्जुषतामाज्जयस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टं य्यज्ञ द्द समिमन्दधातु। व्विश्श्वेदेवा सऽइह मादयन्तामो 3 प्रतिष्ठ्।।

ॐ गणानान्त्वा गणपतिध्वंवामहे प्प्रियाणान्त्वा प्प्रियपतिध्वंवामहे व्वसो मम।

आहमजानि गर्ब्मधमात्त्वमजासि गर्व्मधम्। भूर्भुवः स्वः गणपतये नमः।।
गणपतिमावाहयामि, स्थापयामि, पूजयामि।।

आसन

सुमुखाय नमस्तुभ्यं, गणाधिपतये नमः। गृहाणासनमीश त्वं, विघ्नपुञ्ज
निवारकम्।। इत्यासनं समर्पयामि।।

पाद्यम्

उमापुत्राय देवाय, सिद्धवन्द्याय ते नमः। पाद्यं गृहाण देवेश,
विघ्नराज नमोऽस्तु ते।। इति पादयोः पाद्यं समर्पयामि।।

अर्ध्यम्

एकदन्त महाकाय नागायज्ञोपवीतक। गणाधिदेवदेवेश, गृहाणार्ध्यं नमोऽस्तु
ते। इत्यर्ध्यं समर्पयामि।।

स्नान

सर्वांगे स्नानीयं जलं समर्पयामि।।

पञ्चामृतम्

पयो दधिघृतक्षौद्रैः, शर्करामिश्रितैः कृतम्। पञ्चामृतं गृहाणेदं, स्नानार्थं
विघ्नत्र्जनम् इति पञ्चामृतं समर्पयामि।।

स्नान

नर्मदाचन्द्रभागादि-गङ्गासङ्गमजैर्जलैः। स्नापितोऽसि मया देव, विघ्नसंघं
निवारय।। इतिस्नानीयजलं समर्पयामि।।

वस्त्रम्

रक्ताम्बरधराधीश! पाशङ्कुशधरेश्वर! वस्त्रयुग्मं मया दत्तं, गृहाण परमेश्वर! इति वस्त्रं समर्पयामि।।

यज्ञोपवीत

सूर्यकोटिसमाभास, नागयज्ञोपवीतक। सुवर्णमूलैरचितमुपवीतं गृहाण मे। इत्युपवीतं समर्पयामि।।

आचमनीयम्

सुगन्धमिश्रं तीर्थादि-पूतं पानीयमुत्तमम्।। आचमनं गृहाण त्वं, विघ्नराज वरप्रद। इत्याचमनीयं समर्पयामि।।

गन्धम्

ईसपुत्र नमस्तुभ्यं, नमो मूषकवाहन, गन्धं गृहाण देवेश, सर्वसौख्यं विवर्धय। इति गन्धं समर्पयामि।।

अक्षतान्

अक्षतान्निर्मलान् शुद्धान्, रक्तचन्दनमिश्रितान्। गृहाणेमान्सुरश्रेष्ठ, देहि मे विमलां मतिम्। इत्यक्षतान् समर्पयामि।।

पुष्पाणि

पाटलामल्लिका दूर्वाशतपत्राणि विघ्नहृत्। सुपुष्पाणि गृहाण त्वं, विबुधप्रिय सर्वतः।। इति पुष्पाणि समर्पयामि।।

धूपम्

लम्बोदर विशालाक्ष, धूम्रकेतो नमो नमः। धूपं गृहाण देवेश, विघ्नपुञ्ज निवारय। इति धूपमाघ्रापयामि।।

दीपम्

घृतालवर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश रुद्रप्रिय नमोऽस्तुते। इति प्रत्यक्षदीपं दर्शयामि।।

हस्त प्रक्षालन के पश्चात्

नैवेद्यम्

भालचन्द्र नमस्तुभ्यं, विघ्नहन्मोदकप्रिय। नानाविधं गृहाणेदं, नैवेद्यंकृपयां प्रभो। इति नैवेद्यं निवेदयामि।।

जलम्

लम्बोदर गणाधीश् गौरीपुत्र! नमोऽस्तुते। करान्ननविशुद्ध्यर्थं, जलमेतद् गृहाण मे।। इति जलं समर्पयामि।।

फल

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः, अनन्तपुण्य फलदमतः शान्तिप्रयच्छ मे।।

बायें हाथ में नारियल, दाहिने हाथ से पिधान करके

ॐ रक्ष रक्ष गणाध्यक्ष, रक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता, त्राताभव भवार्णवात्।। द्वैमातुर कृपासिन्धो, षाण्मातुराग्रज प्रभो। वरद त्वं वरं देहि, वांछितं वाञ्छितार्थद। अनेन फलदानेन, फलदोऽस्तु सदा मम। इदं फलं मया देव, स्थापितं पुरतस्तव। तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि। गणपतये निवेद्यार्थं जलेन तं स्नापयेत्।। ॐ गणाधिपतये नमः दूर्वाकुरयुग्मं समर्पयामि। मुखशुद्ध्यर्थे ताम्बूलं पुङ्गीफलं एला लवंग कर्पूरयुतं समर्पयामि नमः।। यथाशक्ति दक्षिणाद्रव्यं समर्पयामि नमः।। ॐ उमापुत्राय नमः। ॐ अघनाशिने नमः। ॐ एकदन्ताय नमः। **ॐ इमवक्त्राय नमः।**

ॐ मूषकवाहनाय नमः। ॐ विनायकाय नमः। ॐ ईशपुत्राय नमः। ॐ सर्वसिद्धिप्रदायकाय नमः। ॐ कुमार गुरवे नमः। ॐ **चतुर्थीशाय** नमः। ॐ सर्वविघ्नहराय नमः।

प्रार्थना

ॐ विघ्नेश्वराय वरदायसुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय। नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ नमो नमस्ते। भक्तार्तिनाशनपराय गणेश्वराय, सर्वेश्वराय शुभदाय सुरेश्वराय। विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते। नमस्ते ब्रह्मरूपाय, विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय करिरूपाय ते नमः। विश्वरूपस्वरूपाय, नमस्ते ब्रह्मचारिणे। भक्तप्रियाय देवाय, नमस्तुभ्यं विनायक। त्वां विघ्नशत्रुदलनेति च सुन्दरेति, भक्तिप्रदेति सुखदेति फलप्रदेति। विद्याप्रदेत्यघहरेति च ये स्तुवन्ति, तेभ्यो गणेश वरदो भव नित्यममेव।। लम्बोदर नमस्तुभ्यं, सततं मोदकप्रिय। निर्विघ्नं कुरु मे देव, सर्वकार्येषु सर्वदा। आवाहनं न जानामि, न जानामि तवाऽर्चनम्। पूजाञ्चैव न जानामि, क्षमस्वेति गणेश्वर।।

चन्द्रादित्यौ च धरणी च विद्युदग्निस्तथैव च।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्।।

नानासुगन्धि पुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मयादत्तो गृहाण परमेश्वर।।

नवग्रह-पूजनम्

सूर्य	:	मण्डल के मध्य में (गोलाकार - लाल)
चन्द्र	:	अग्निकोण (अर्धचन्द्र - सफेद)
मङ्गल	:	दक्षिण में (त्रिकोण-लाल)
बुध	:	ईशान कोण (धनुष - हरा)
बृहस्पति	:	उत्तर में (अष्टदल - पीला)
शुक्र	:	पूर्व में (चतुष्कोण - सफेद)
शनि	:	पश्चिम में (मनुष्य - काला)
राहु	:	नैर्ऋत्य कोण में (मकर - काला)
केतु	:	वायव्य कोण में (ध्वजा काली - तलवार)

यंत्र

पूर्व

उत्तर

बुध हरित	शुक्र सफेद	चन्द्र श्वेत
वृहस्पति पीत	रवि रक्त	मंगल रक्त
केतु काला	शनि काला	राहु काला

दक्षिण

पश्चिम

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमि सूतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वेग्रहाः शान्तिकरा भवन्तु।।

सूर्य

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्। तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।। ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य्येहागच्छेहतिष्ठ, सूर्यायनमः, सूर्यमावाहयामि, स्थापयामि।।

चन्द्र

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्। नमामि शशिनं सोमं शम्भोर्मुकुट भूषणम्।। ॐ भूर्भुवः स्वः यमुनातीरोद्भवअत्रेयसगोत्र शुक्लवर्ण भोः।। सोमेहागच्छेहतिष्ठ, सोमायनमः, चन्द्रमावाहयामि स्थापयामि।।

मंगल

धरणीगर्भसम्भूतं विद्युत्कान्ति समप्रभम्। कुमारं शक्तिहस्तं तं मंगलंप्रणमाम्यहम्।। ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण दक्षिणे भोः। भौमेहागच्छेह तिष्ठ भौमाय नमः, भौम मावाहयामि स्थापयामि।।

बुध

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्। सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्।। ॐ भूर्भुवः स्वः, मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण ईशाने भोः। बुधेहागच्छेह तिष्ठ, बुधाय नमः, बुध मावाहयामि स्थापयामि।।

वृहस्पति

देवानां च ऋणीणां च गुरुं काञ्चनसन्निभम्। बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्।। ॐ भूर्भुवः स्वः सिन्धुदेशोद्भवङ्गिरसगोत्र पीतवर्ण उत्तरे भोः। बृहस्पते। इहागच्छेह तिष्ठ, बृहस्पते नमः, बृहस्पति मावाहयामि स्थापयामि।।

शुक्र

हिमकुन्द मृणालाभं दैत्यानां परम् गुरुम्। सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम्।। ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण पूर्वे भोः। शुक्रइहागच्छेह तिष्ठ। शुक्राय नमः, शुक्रं मावाहयामि स्थापयामि।।

शनि

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम्। छायामार्तण्डसंभूतं तं नमामि शनैश्चरम्।। ॐ भूर्भुवः स्वः, सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्णं पश्चिमे भोः। शने इहागच्छेह तिष्ठ। शनैश्चरायनमः, शनैश्चर मावाहयामि स्थापयामि।।

राहु

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्। सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्।। ॐ भूर्भुवः स्वः, राठिनापुरोद्भव पैठिनसगोत्र नीलवर्ण नैऋत्यां भोः राहो। इहागच्छेह तिष्ठ, राहवे नमः, राहुमावाहयामि स्थापयामि।।

केतु

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्। रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।। ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण वायव्यां भोः केतो। इहागच्छ इहतिष्ठ, केतवे नमः, केतुं मावाहयामि स्थापयामि।।

ॐ ब्रह्मणे नमः, ॐ वरुणाय नमः, ॐ आदित्याय नमः, ॐ सोमाय नमः, ॐ भौमाय नमः, ॐ बुधाय नमः, ॐ बृहस्पतये नमः, ॐ शुक्राय नमः, ॐ शनैश्चराय नमः, ॐ राहवे नमः, ॐ केत्रवे नमः।। ॐ ईश्वराय नमः, ॐ भूमायै नमः, ॐ स्कन्दाय नमः, ॐ विष्णवे नमः, ॐ ब्रह्मणे नमः, ॐ इन्द्राय नमः, ॐ यमाय नमः, ॐ कालाय नमः, ॐ चित्रगुप्ताय नमः।। ॐ अग्नये नमः, ॐ अद्भयो नमः, ॐ भूम्यै नमः, ॐ विष्णवे नमः, ॐ इन्द्राय

नमः, ॐ इन्द्राण्यै नमः, ॐ प्रजापतये नमः, ॐ सर्वेभ्यो नमः, ॐ ब्रह्मणे नमः।। ॐ विनायकाय नमः, ॐ वायवे नमः, ॐ दुर्गायै नमः, ॐ आकाशाय नमः, ॐ अश्विभ्यां नमः, ॐ वास्तोस्पतये नमः, ॐ क्षेत्राधिपतये नमः। ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतयै नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुबेराय नमः, ॐ ईशानाय नमः, ॐ ब्रह्मणे नमः, ॐ अनन्ताय नमः।।

आवाहनम्

आगच्छन्तु महाभागा, भास्कराद्या नवग्रहाः।
यज्ञस्यास्य प्रशान्त्यर्थ, सर्वाऽनुग्रहकारकाः।।

आसनम्

सुवर्णरत्नखचितं, शुद्धोर्णानिर्मितं शुभम्।
आसनन्तु मयानीतं, भास्कराद्या नवग्रहाः।।

पाद्यम्

शुद्धपात्रे स्थितं दिव्यं, जलं तीर्थोद्भवं परम्।
प्रतिगृह्णन्तु मे पाद्यं, भास्कराद्या नवग्रहाः।।

अर्घ्यम्

नानातीर्थोद्भवं वारि, कर्पूरादिसुवाषितम्। अर्घ्यं गृह्णन्तु सम्प्रीया, भास्कराद्या नवग्रहाः।। सर्वाङ्गे स्नानीयं समर्प.।।

पञ्चामृतम्

दधिदुग्धघृतक्षौद्रसिताभिः परिकल्पितम्। स्नानार्थं प्रतिगृह्णन्तु, भास्कराद्या नवग्रहाः।। पञ्चामृतस्नानं समर्पयामि।।

जलम्

गङ्गागोदावरीकृष्णागोमतीभ्यः समाहृतम्। सलिलं प्रतिगृह्णन्तु, भास्कराद्या नवग्रहाः।। शुद्धोदकस्नानीयं समर्पयामि। मुखे ह्याचमनीयंसमर्पयामि। पुनराचमनं समर्पयामि।।

वस्त्रम्

सम्यक् शुद्धानि वासांसि, तथालङ्करणानि च। मया नीतानि गृह्णन्तु भास्कराद्या नवग्रहा।। वस्त्रोपवस्त्रं समर्पयामि।।

यज्ञोपवीत

नवभिस्तन्तुभिर्युक्तं, त्रिगुणं देवतामयम्। उपवीतानि दत्तानि गृह्णन्त्वन्त नवग्रहाः।। यज्ञोपवीतानि समर्पयामि।। पुनराचमनीयं समर्पयामि।।

चन्दनम्

मलयाऽद्रिसमुद्भूतं, कस्तूरीशशिसंयुतम्। मयाऽर्पितञ्च गृह्णन्तु, भास्कराद्या नवग्रहाः।। गन्धं समर्पयामि।।

अक्षत

शुद्धमुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः। द्योतयामि महाभक्त्या, भास्करादीन्नवग्रहान्।। अक्षतान् समर्पयामि।।

अबीरं गुलालं हरिद्राचूर्णञ्च समर्पयामि। सौभाग्यद्रव्याणि समर्पयामि। सिन्दूरं समर्पयामि। नानासुगन्धिद्रव्याणि समर्पयामि।।

पुष्प

मालत्यादीनि पुष्पाणि, दूर्वायुक्तान्यनेकशः। मयाऽर्पितानि गृह्णन्तु, भास्कराद्या नवग्रहाः। पुष्पाणि समर्पयामि।।

धूपमाघ्रापयामि। प्रत्यक्षदीपं दर्शयामि। नैवेद्यं निवेदयामि, नैवेद्यं पुरतः कृत्वा, गन्ध-पुष्पे प्रक्षिप्य ।। धेनुमुद्राञ्च प्रदर्श्य"

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ व्यानाय स्वाहा। आचमनीयम् समर्पयामि।।

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम्। तस्मात्फलप्रदानेन पूर्णाः सन्तु मनोरथाः। ऋतु फलानि समर्पयामि।।

मुखवासनार्थे ताम्बूलं समर्पयामि। पूंगीफलानि समर्पयामि। दक्षिणाञ्च समर्पयामि।।

प्रार्थना

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वेग्रहाः शान्तिकरा भवन्तु।।

सद्बुद्धिच बुधो गुरुश्च गुरुतां

सूर्योःशौर्यमथेन्दुऊच्चपदवीं सन्मङ्गलं मंगलः, शुक्रः शुभं शं शनिः

राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु ममते सर्वेऽनुकूला ग्रहाः।। आयुश्च विद्याश्चतथा सुखञ्च धर्मार्थलाभा बहुपुत्रताञ्च। शत्रुक्षयं राजसुपूज्यतां च तुष्टाग्रहाः क्षेमकरा भवन्तु।। मंत्रहीनं क्रियाहीनं भक्तिहीनं तवार्चनम्। मया कृतञ्च यत्तद्भोः क्षमध्वंग्रहदेवता।। अनेन पूजनेन श्रीसूर्य्यादि नवग्रहमण्डलदेवताः प्रीयन्ताम्।।

कुल-देवता (नारसिंह भगवान)

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं। विश्वाधारं गगनसदृशं मेघवर्ण शुभाङ्गम्।। लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं। वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

कस्तूरीतिलकं ललाटपटले वक्षस्थले कौस्तुभम्। नासाग्रे वरमौक्तिकं करतले वेणु करे कङ्कणम्।। सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली। गोपस्त्रीपरिवेष्टितो विजयते गोपालचूड़ामणि।।

यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुवन्ति दिव्यैःस्तवेः। वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।। ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिने। यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः।।

आवाहन

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् स भूमिंधंसर्वतः स्पृत्वात्यतिष्ठद्शाङ्गुलम्।। आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव। यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव।।

प्रतिष्ठा

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन।।

आसन

ॐ पुरुष एवेद घंसर्व यद्भूतं यच्चभाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति।। आसनं समर्पयामि।।

पाद्य

ॐ एतावानस्य महिमातो ज्यायांश्च पूरूषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।। पाद्यं समर्पयामि।।

अर्घ्य

ॐ श्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि।। अर्घ्यं समर्पयामि।।

आचमन

ॐ ततो व्विराडजायत व्विराजो अधि पूरूषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।। आचमनीयं समर्पयामि।।

मधुपर्क

कांस्ये कांस्येन पिहितो दधिमध्वाज्य संयुतः।
मधुपर्को मयानीतः पूजार्थ प्रतिगृह्यताम्।। मधुपर्कं।।
(घी - एक भाग शहद - दो भाग, दधि - एक भाग तुलसी पत्र)

स्नान

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्चये।। स्नानं समर्पयामि।

दुग्धस्नान

ॐ पयः पृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्यम्।। दुग्धस्नानं समर्पयामि।।

पुनर्जल स्नान

गङ्गासरस्वतीरेवा पयोष्णीनर्मदाजलैः।
स्नापितोऽसि मया देव तथाशान्ति कुरुष्व मे ।। जलस्नानं समर्पयामि।।

दधि स्नान

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वा जिनः।
सुरभिनो मुखाकरत्प्रण आयूधंषितारिषत् ।। दधिस्नानं समर्पयामि।।

घृत स्नान

ॐ घृतङ्घृतपावानः पिवत वसां वसापावानः। पिवतान्तरिक्षस्यहविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा।। घ.पु.।।

मधु स्नान

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।।
मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधुद्यौरस्तुनः पिता।। मधुमान्नो वनस्पतिर्मधुमाँअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।।

शर्करा स्नान

ॐ अपाॐ रसमुद्वयसंॐ सूर्ये सन्तॐ समाहितम् अपाॐ रसस्य यो रसस्तं वो गृहणाम्युतममुपयाम गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाभ्येष ते योनिरिन्द्राय त्वा तुष्टमम्।।

पञ्चामृत स्नान

ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्त्रोतसः।
सरस्वती तु पञ्चवधा सो देशेऽभवत्सरित्।।

शुद्धोदकस्नान

कावेरी नर्मदा वेणी तुंगभद्रा सरस्वती। गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम्। गृहाण त्वं रमाकान्त स्नानाय श्रद्धया जलम्।। शु.स.।।

वस्त्र

ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्द्रांसि पसिरे तस्माद्यजुस्तस्मादजायत्।।

यज्ञोपवीत

ॐ तस्मादश्वा अजायन्त ये के चोभयादतः।
गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः।।

चन्दन

श्रीखण्डचन्दनं दिव्यं गन्धाड्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्।। चन्दनं समर्पयामि।।

रक्त-चन्दन

ॐ रक्तचन्दनं संमिश्रं पारिजातसमुद्भवम्।
गृहाणाशु चन्दनं गन्धं संयुतम्।। र.चं.स.।।

गन्ध

ॐ तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः
तेनदेवा अयजन्त साध्या ऋषयश्च ये।। गन्धं समर्पयामि।।

अक्षत (श्वेत तिल)

ॐ अक्षन्नमीमदन्तहयवप्रिया अधूषत
अस्तोषतस्वभानवो विप्रानविष्ठयामती योजान्विन्द्र ते हरी।।

पुष्प

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढ़मस्य याऊँसुरे स्वाहा ।। पु.स.।।

पुष्पमाला

ॐ ओषधीः प्रतिमोदध्वम्पुष्पवतीः प्रसूवरीः।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः।।

तुलसीपत्र

ॐयत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किंम्बाहू किमूरूपादा उच्येते।। तु.स.।।

तुलसी मंजरी

तुलसी हेमरूपां च रत्नरूपाञ्चमञ्जरीम्। भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियम्।। तु.स.।। ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि यस्यशे इन्द्रस्य युज्रवः सखा।। तु.स.।।

बिल्वपत्र

तुलसी बिल्वनिम्बैश्च जंवीरैरामलैः शुभैः।
पञ्चबिल्वमिति ख्यातं प्रसीद परमेश्वर।। वि.स.।।

दुर्वा

विष्ण्वादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा।
क्षीरसागरसंभूते वंशवृद्धिकरी भव।। दू.स.।।

शमीपत्र

शमी शमयते पापं शमी शत्रुविनाशिनी।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी।। श.स.।।

आभूषण

ॐ रत्नकङ्कणवैदूर्यमुक्ताहारादिकानि च। सुप्रसन्नेन मनसां दत्तानि स्वीकुरुष्व भोः।। आ.स.।।

अबीर-गुलाल

अबीरं च गुलालं च, चोबा चन्दनमेव च।
अबीरेण अर्चिता देवा गृह्यतां परमेश्वर।। अबी.स.।।

सुगन्ध तेल

ॐ तैलानि च सुगन्धीनि द्रव्याणि विविधानि च।
मया दत्तनि लेपार्थं गृहाण परमेश्वर।।

धूपः

ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यकृतः। उरू तदस्य यद्वैश्यः पद्भ्या शूद्रो अजायत्।। ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति त धूर्वयं वयं धूर्याभः। देवानामसि वहिनतमॐ सस्नितमं वप्रितमं जुष्टतमन्देव हूतमम।। धूपमाघ्रापयामि।।

दीप

ॐ चन्द्रमा मनसो जातश्श्वचक्षोः सूर्यो अजायत्।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत्।। दीपं दर्शयामि।।

हस्तप्रक्षालनम् के पश्चात्

नैवेद्य में तुलसी छोड़कर नीचे लिखी मुद्राओं को करें :

प्राणाय स्वाहा - कनिष्ठा, अनामिका और अंगूठा मिलावें।

अपानाय स्वाहा - अनामिका, मध्यमा और अंगूठा मिलावें।

व्यानाय स्वाहा - अध्यमा, तर्जनी और अंगूठा मिलावें।

उदानाय स्वाहा - तर्जनी, मध्यमा, अनामिका व अंगूठा मिलावें।

समानाय स्वाहा - तर्जनी, मध्यमा, अनामिका, कनिष्ठा और अंगूठा मिलावें।

घृतपक्वं हविष्यान्नं पायसञ्च स सर्करम् नानाविधं च नैवेद्यं विष्णो मे प्रतिगृह्यताम्।। इति नैवेद्यं निवेदयामि।। यन्मयाभक्तियुक्तेन पत्रं पुष्पं फलं जलम्।। निवेदितश्च तद्गृहाणानुकम्पया।।

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम्। इष्णन्निषाणामुंम्म इषाण सर्वलोकम्म इषाण।। नैवेद्यं निवेदयामि।।

मध्ये पानीय

एलोशीरलवङ्गादि कर्पूरपरिवासितम्।
प्राशनार्थं कृतं तोयं गृहाण परमेश्वर।। म.स.।

ऋतुफल

बीजपूराम्रपनसखर्जूरी कदलीफलम्।
नारिकेलफलं दिव्यं गृहाण परमेश्वर।। ऋ.स.।।
फलेन फलितं सर्वं त्रैलोक्यं सचराचरम्।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः।। अखण्डऋतुफलं समर्पयामि।।

आचमन

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम्।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः।। आचमनीयं समर्पयामि।।

ताम्बूल-पूंगीफल

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
व्वसन्तोऽस्या सीदाज्यं ग्रीष्म इध्मः शरद्धविः।। ताम्बूलं समर्पयामि।।

दक्षिणा

पूजाफलसमृद्ध्यर्थं दक्षिणा च तवाग्रतः।
स्थापिता तेन मे प्रीतः पूर्णान् कुरु मनोरथान्।। दक्षिणाद्रव्यं समर्पयामि

शंखजलमाहात्म्यम्

शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं हरेत्।।

बन्दे श्रीनारसिंह गरुड़सुरमुनिक्रोड केदारगङ्गा। मार्कण्डेयाग्निती द्रविणद भगवत्पाद दुर्गागणेशान्।। **बदरीनाथनारायणाख्य-ब्रह्मप्रह्लाद-योगीश्वर पदकमल श्रीनृसिंञ्च भक्त्या।।**

मत्स्याश्वकच्छपनृसिंहवराहहंस। राजन्यविप्रविबुधेषु कृतावतारः।। त्वं पासि नस्त्रिभुवनञ्च यथाधुनेश। भारं भुवो हर यदूत्तम् वन्दनं ते।।

योगे योगविदां नेता प्रधानपुरुषेश्वरः।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः।।

अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।
हृषीकेश जगन्नाथं वागीशं वरदायकम्।।

नमोऽस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षिशिरोरुवाहवे।
सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटि युगधारिणे नमः।।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

आकाशात्पतितं तोयं यथा गच्छति सागरम्।
सर्वदेवनमस्कारः केशवं प्रतिगच्छति।।

मूकं करोति वाचालं पङ्गुं लंघयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम्।।

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव। त्वमेव विद्याद्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव।। पापोऽहं पापकर्माहं पापात्मा पापसम्भवः। त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव।।

प्रदक्षिणा

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषा ँ सहस्त्रयोजनेऽवधन्वानि तन्मासि।।

क्षमा-प्रार्थना

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे।।

यदक्षर पद भ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर।।

सर्वेभ्यो देवेभ्यो नमः।।

विसर्जन

गच्छन्तु च सुरश्रेष्ठाः स्वस्थानं परमेश्वराः।
यजमान हितार्थाय पुनरागमनाय च।।

यजमान आशीर्वाद मंत्र

अक्षतान् विप्रहस्तातु नित्यं गृह्णन्ति ये मे नराः।
चत्वारि तेषां वर्धन्ते आयुः कीर्तिर्यशो बलम्।।
श्रीर्वर्चस्व मायुष्यमारोग्यमाविंधात् पवमानं महीयते।
धनं धान्यं पशु बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः।।
मन्त्रार्था सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव।।

गुरु पूजन

ध्यान

पंदघ्रिकमलद्वन्द्वं द्वन्द्वतापनिवारकम्।
तारकं भव सिंधोश्च श्री गुरुं प्रणमाम्यहम्।।

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः।
गुरुरेव परंब्रह्म तस्मै श्री गुरवे नमः।।

अज्ञान तिमिरान्धस्य ज्ञानांजन शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।

अखण्डमंडलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः।।

ॐ शिवं गोरक्षदेवं च तीर्थं गंगाधरं तथा।
नारायणतीर्थवरं अमितंतीर्थमेव च।।
ओंकारानन्द तीर्थं च शक्तिपातस्य देशिकान्।
प्रणमामि सदा भक्त्या योग मार्गस्य सिद्धये।।

ॐ संविदामोद संभारं पूरितं ज्ञानदं शुभम्।
जितेन्द्र भारतीयं तं श्री गुरुं प्रणमाम्यहम्।।

ध्यानमूलं गुरोमूर्तिः पूजामूलं गुरोः पदम्।
मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोकृपा।।

ॐ गुरुदेवाय विद्महे परम गुरवेच धीमहि तन्नो श्रीगुरुः प्रचोदयात्।।

पूजनम्

आसनार्थे अक्षतान् समर्पयामि। पादयोः पाद्यं समर्पयामि, हस्तयोऽर्घ्यं समर्पयामि। अर्घ्यान्ते आचमनीयं समर्पयामि। स्नानं समर्पयामि, स्नानान्ते आचमनीयं

समर्पयामि। पञ्चामृतं स्नानं समर्पयामि। शुद्धोदक स्नानं समर्पयामि। वस्त्रोपवस्त्रं समर्पयामि। अथोपवीतम् समर्पयामि। ॐ लं पृथिव्यात्मकं गुरवे गंधं चन्दनं विलेपयामि नमः। अंगुष्ठकनिष्ठाभ्यां।। ॐ हं आकाशात्मकं गुरवे अक्षरञ्च पुष्पाणि समर्पयामि नमः।। अंगुष्ठ अनामिकाभ्यां।। ॐ यं वायूवात्मने गुरवे धूपं आघ्रापयामि नमः।। अंगुष्ठ मध्यमाभ्यां।। ॐ रं वह्न्यात्मकं गुरवे दीपं दर्शयामि नमः।। अंगुष्ठ तर्जनीभ्यां।। ॐ वं अमृतात्मकं गुरवे नैवेद्यं निवेदयामि नमः।। अंगुष्ठ अनामिकाभ्यां।। ॐ सं सोमात्मकं गुरवे तांबूलं समर्पयामि नमः सर्वाङ्गुलीभिः।। जितेन्द्रचन्द्रनाथं श्रीपादुकायै परिपूजयामि नमः।। ॐ ऐं ह्रीं श्रीं हसमखफ्रेंह्सौः हसक्षमल वरयूं सहसखफ्रें सहौसहक्ष, मलवरयूंह्सौः जितेन्द्रचन्द्रनाथ (अमुकानंदनाथ) वा श्रीपादुकां पूजयामिनमः।। गुरु पादुका मंत्रं दशधा सप्तधा वा प्रजप्य जपं गुरोप्रर्दक्षिणा करणीया।। ॐ गुह्याति गुह्य गोप्तस्त्वं गृहाणास्मत् कृतंजपं सिद्धिर्भवतु मे देव त्वत्प्रसादान्महागुरो।।

मातंगी भुवनेश्वरी च वगला धूमावती भैरवी। तारा छिन्नशिरोधरा भगवती श्यामा रमा सुन्दरी। दातुं न प्रभवन्ति वांछित फलं यस्य प्रसादं बिना। तं बन्दे शिवरूपिणं निज गुरुं सर्वार्थ सिद्धिप्रदम्।।

काशी द्वारावती प्रयाग मथुरायोध्या गयावंतिका। माया (हरिद्वार) पुष्कर कांचिकोत्कलगिरी श्री शैलविंध्यादयः। नैते तारयितुं भवन्ति कुशलाः यस्य प्रसादं बिना। तं वन्दे शिवरूपिणं निज गुरुं सर्वार्थसिद्धिप्रदम्।।

यस्यस्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम्। सदैव सर्व सम्पति तस्मै श्री गुरवे नमः।।

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम्। द्वन्द्वातीतं गगनसदृशं तत्वमस्यातिदलक्ष्यम्।। एकं नित्यं विमलमचलं सर्वदा साक्षिभूतम्। भावातीतं त्रिगुणरहितं सद्गुरुं तन्नमामि।।

कलश-स्थापनम्

कलश स्थापन के स्थान में पूजन के पहले गन्धादि से अष्टदल कमल बनाकर उस पर कलश स्थापित करना चाहिए।

भूमि स्पर्श

ॐ भूरसि भूमि रस्यदितिरसि विश्वधाया विशस्य भुवनस्य धर्त्री।
पृथिवीं यच्छ पृथिवीं हॐह पृथिवीं मा हिॐसीः।।

सप्तधान्य स्थापन

ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वौदानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषेधां देवो वः सविता हिरण्यपाणिः प्रतिगृम्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोसि।।

कलश-स्थापन

ॐ आतिधू कलशं मह्या त्वा विशन्त्विन्दवः पुनरुर्जा निवर्तस्व सा नः।
सहस्त्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिः।।

जल

ॐ वरुणस्योत्तभ्यनमसि वरुणस्य स्कम्भ सर्जनीस्थो वरुणस्य
ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद।।

गन्ध

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।

सर्वोषधी

ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा।
मनैनु वभ्रूणामहशतन्धामानि सप्त च।।

दूर्वा

ॐ काण्डात्काण्डात्प्ररोहनी परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च।।

पञ्चपल्लव

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृत्स।
गोभाज इत्किलासथ यत्सनवथ पूरुषम्।।

सप्तमृत्तिका

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः।।

पूंगीफल

ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः
वृहस्पतिप्रसूतास्ता नो मुञ्चवन्त्वꣳहसः।।

पञ्चरत्न

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत। दधद्रत्नानि दाशुषे।।

स्वर्ण

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमाङ्कस्मै देवाय हविषाविधेम।।

वस्त्र

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम्।
देवस्त्वा सवितापुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः।।

पूर्णपात्र

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत।
वस्नेव विक्रीडावहा इषमूर्जघ्शतक्रतोः।।

श्रीफल

ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणा मुम्म इषाण सर्वलोकम्म इषाण।।

वरुणावाहन्

ॐ तन्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेउमानो वरुणेह वोध्युरूशस मान आयुः प्रमोषी।। अस्मिन् कलशे वरुणं साङ्गंसपरिवारं सायुधं सशक्तिकमावाहयामि।। ॐ भूर्भुवः स्वः भो वरुण इहागच्छ इहातिष्ठ स्थापयामि पूजयामि।।

देवावाहन

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु देवपूजार्थं दुरितक्षराकारकाः।। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूलेतस्य स्थितोब्रह्मा मध्ये मातृगणास्मृताः।। कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।। अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।।

प्रतिष्ठा

ॐ मनोजूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमंन्तनोत्वरिष्टं यज्ञंसमिमं यन्दधातु। विश्वेदेवा स इहमादयन्तामोंम् प्रतिष्ठ कलशेवरूणाद्यावाहिताः देवताः सुप्रतिष्ठिताः वरदाः भवन्तु।।

ॐ शन्नोदेवीरभिष्टय आपो भवन्तुपीतये, शंयोरभिस्रवन्तु नः।। गङ्गेच यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरी जलेऽस्मन् सन्निधिं कुरु।।

ॐ भूर्भुवः स्वः, भो वरुण! इहागच्छेह तिष्ठ, आगच्छागच्छ वरुण, विघ्नविध्वंसकारक, मम कार्यविवृद्ध्यर्थं, स्थितिं कुरु जलाधिप।।

आसनं

पुष्पासनं महदिव्यं सर्वरङ्गविरञ्चितम्।
जलाधिप गृहाणं त्वं, सर्वसौख्यं विवर्धय।।

पाद्यम्

गङ्गादितीर्थसम्भूतं, सुतप्तं जलयुत्तमम्।
पाद्यं गृहाण देवेश, जलेशाय नमो नमः।।

अथाऽर्ध्यम्

सुतीर्थजं जलं शुद्धं गन्ध पुष्पाक्षतैर्युतम्।
अर्ध्यं गृहाण वरुणं सर्वापत्तिनिवारक।।

पञ्चामृतम्

पयो दधि घृतक्षौद्रशर्करासम्भवं परम्।
पञ्चामृतं गृहाण त्वं, जलाधिप! नमोऽस्तुते।।

जलम्

गङ्गासरस्वतीकृष्णासरयूसम्भवं जलम्।
नानासुगन्धिसंमिश्रं स्नानीयं स्वीकुरु प्रभो।।

चन्दन

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं समनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्।।

अक्षत

शुद्धमुक्ताफलाभैस्तै रक्षतैः शशिसन्निभैः।
द्योतयामि जलेशत्वां सर्वसम्पत्करो भव।।

पुष्पाणि

मालतीमल्लिकादीनि पुष्पाणि ऋतुजानि च।
प्रकल्पयामि वरूण सर्वाऽभीष्ट फलप्रदम्।।

धूपम्

चन्दनागुरुचन्द्रैश्च संयुतं गुग्गुलान्वितम्।
घृताम्यक्तं गृहाणं त्वं धूपं वरुण सर्वतः।।

दीपम्

साज्यं सद्वर्तिकायुक्तं वह्निनायोजितं मया।
दीपं गृहाण वरुण शान्तिं कुरु दयानिधे।।

नैवेद्य

शर्कराघृतसमिश्रं गोधूमं साधुसत्कृतम्।
पाशिन् गृहाण नैवेद्यं सदा सौख्यं विवर्धय।।

जलम्

सुशीतलं जलं शुद्धं करपादाऽऽस्यशोधनम्।
गृहाण परया प्रीत्या जलेशाय नमोनमः।।

अथोपायनम्

हैमराजतताम्रद्यन्यतमं यन्मयाहृतम्।
उपायनं जलेश त्वं, गृहाण मम सिद्धये।।

प्रार्थना

ॐ देवदानवसम्वादे मथ्यमाने महादधौ उत्पन्नोऽसि यदा कुम्भ विधृतो विष्णुना स्वयम्।। त्वत्तोये सर्वतीर्थानि देवाः सर्वेत्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।। शिव स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्राः विश्वेदेवाः सपैतृकाः।। त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः त्वत्प्रसादादियां पूजां कर्तुमीहे जलोद्भव।। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा। प्रसन्नो भव सर्वदा।। वरदो भव सर्वदा।।

अक्षत

अनया पूजया वरूणाद्यावहिताः देवताः प्रीयन्तां न मम।।

अथ पञ्चोपचार आसनम्

पूर्व

	ब्रहमा १		
उत्तर पृथ्वी ४	यज्ञ पुरुष ५	गायत्री २	दक्षिण
	गोवर्द्धन ३		

पश्चिम

१५ यन्त्रम्

६	१	८
७	५	३
२	९	४

पश्चिम

षोडशमातृका आसनम्

आत्मन कुलदेवता १६	लोक मातरः १२	देन सेवा ८	मेघा ४
तुष्टिः १५	मातरः ११	जया ७	शची ३
पुष्टि १४	स्वाहा १०	विजया ६	पद्मा २
घृति १३	स्वधा ९	सावित्री ५	गौरी गौजपूर १

३४ यन्त्रम्

७	१२	१	१४
२	१३	८	११
१६	३	१०	५
९	६	१५	४

स्वस्तिक

पञ्चलोकपाल-पूजनम्

बायें हाथ में अक्षत लेकर दाहिने हाथ से प्रत्येक मंत्र से -

गणपति

ॐ गणानांत्वा गणपति ध्वंवामहे प्रियाणां त्वा प्रियपति ध्वंवामहे निधीनां त्वा निधिपति ध्वंवामहेवसो मम, आहमजानि गर्भधमात्त्वमजासि गर्भधम्।। ॐ भूर्भुवः स्वः गणपते इहागच्छ इहतिष्ठ, गणपतये नमः।।

देवी

ॐ जातवेदसे सुनवाम सोममराती मतोनिदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वामावेव सिन्धुं दुरितात्यग्नि। ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इहतिष्ठ, दुर्गायै नमः।।

वायु

ॐ आ नो निमुद्भिः शीतनीमिरध्वरं ॐ सहस्त्रिणीभिरूपयाहि यज्ञम्। वायो अस्मिन्सवने यादयस्व यूमम्पात स्वस्तिभिः सदा नः।। ॐ भूर्भुवः स्वः वायो इहागच्छ इहतिष्ठ, वायवै नमः।।

आकाश

ॐ घृतं घृतयावानः पिवत वसां वसायावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।। दिशः प्रदिशं आदिशो विदिश उद्दिशो दिग्म्यः स्वाहा।। ॐ भूर्भुवः स्वः आकाश इहागच्छ इहतिष्ठ आकाशाय नमः।।

अश्विनी

ॐ या काङ्कशायधुमत्याश्विना सूनृतावती। तया यज्ञम्मिमिक्षतम्।। उपयाम गृहीतोऽस्यश्विम्यान्त्वैषते योनिर्याध्वीभ्यां त्वा।। ॐ भूर्भुवः स्वराश्विना इहागच्छतम् इहतिष्ठतम्। अश्विभ्यां नमः इत्यावाह्य।। ॐ गणपत्यादि-पञ्चलोकपालेभ्यो नमः।। अनया पूजया गणपत्यादि-पञ्चलोकपालाः प्रीयन्तां न मम।।

दशदिक्पाल-पूजनम्

इन्द्र (पूर्व में)

ॐ त्रातारमिन्द्रमवितारमिन्द्र हवेहवे सुवह शूरमिन्द्रम् ह्यामि शक्रम्पुरुहुतमिन्द्र ॐ स्वस्ति नो महावा धात्विन्द्रः इन्द्राय नमः ।। इन्द्रं आवाहयामि स्थापयामि ।।

अग्नि (अग्निकोण)

ॐ अग्निदूतं पुरोदधे हव्यवाहमुपवृवे देवाँ आसादयादिह ।। अग्नये नमः ।। अग्नि मावाहयामि स्थापयामि ।।

यम (दक्षिण)

ॐ असि ययो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्त आह्रुस्ते त्रीणि दिवि वन्धनानि ।। यमाय नमः ।। यमं आ. स्था. ।।

नैऋत्य कोण

ॐ एषते निर्ऋते भागस्तं जुषस्य स्वाहाग्निनेत्रेभ्यो देवेभ्यः पुरःसदभ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्य स्वाहा विश्वेदेवनेत्रेभ्योदेवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुण नेत्रेभ्यो वा मरुनेत्रेभ्यो वां देवेभ्यः उत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यः उपरिसदभ्यो हुवस्वद्भ्यः स्वाहा। नैर्ऋताय नमः ।। नैर्ऋतं आ.स्था. ।।

वरुण (पश्चिम)

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वा मवस्युराचके वरुणाय नमः। वरुणं मावाहयामि स्थापयामि ।।

वायु (वायुकोण में)

ॐ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्।
शिवोनियुद्भिः शिवाभिः। वायवे नमः। वायुं आ.स्था.।।

कुबेर (उत्तर में)

ॐ कुविदङ्ग मवमन्तो पचं चिद्यथादान्त्यनुपूर्व विभूम। इहेहैषां कृणुहि भोजनानि ये वर्हिषो नमं उक्तिं यजान्ते।। कुबेराय नमः।
कुबेरं आ.स्था.।।

ईशान (ईशानकोण)

ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पामुरदब्धः स्वस्तये।। ईशानाय नमः।। ईशान आ.स्था.।।

ब्रह्मा (ईशान पूर्व के मध्य)

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः।
स बुध्न्या उपमा अस्य बिष्ठाः सतश्च योनिमसतश्च विवः।।
ब्रह्मणे नमः।। ब्रह्माणं आ.स्था.।।

अनन्त (नैर्ऋत पश्चिम के मध्य)

ॐ नमोऽस्तु सर्वेभ्योयेके च पृथिवीमनु। ये अन्तरिक्षे ये देवि तेभ्यः सर्वेभ्यो नमः।। अनन्ताय नमः।। अनन्तं आ.स्था.।।

ॐ इन्द्रादि दश दिक्पालेभ्यो नमः।। अनया पूजया दशदिक्पाल देवताः प्रीयन्ताम्।। प्रसन्नाः भवन्तु वरदा भवन्तु।।

षोडशमातृका-पूजनम्

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः।। हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः गणेशेनाधिका ह्येता वृद्धो पूज्याश्च षोडश।। ॐ भूर्भुवः स्वः मातृकाभ्यो नमः इहागच्छत इहतिष्टत।। ॐ गौर्यादिषोडशमातृकाभ्यो नमः।।

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते।। अनया पूजया गौर्यादिषोडशमातरः प्रीयन्तान मम्।।

चतुःषष्टि योगिनी-पूजनम्

आवाहयाम्यहं देवी योगिनी परमेश्वरी।
योगाभ्यासेन सन्तुष्टाः परध्यानसमन्विताः।।
चतुःषष्टिः समाख्याता योगिन्यो हि वरप्रदाः।
ॐ चतुःषटियोगिनी मातृकाभ्यो नमः।
अनया पूजया चतुःषष्टियोगिन्यः प्रीयन्तां न मम्।।

ज्योति पूजनम्

शुभं भवतु कल्याण मारोग्यं पुष्टिवर्द्धनम्।
आत्मतत्व प्रबोधाय दीपज्योतिर्नमोऽस्तु ते।।

सर्वस्वरूपे। सर्वेशे सर्वशक्तिस्वरूपिणी।
पूजां गृहाण कौमारि। जगन्मातर्नमोऽस्तुते।।
गंधाक्षत पुष्पाणि समर्पयामि। ॐ दिवाकरायनमः।।

ॐ भूर्भुवः स्वः। भो दीप देवरूपस्त्वं कर्मसाक्षिह्यविघ्नकृत, इहागच्छ, स्थाने चात्र स्थिरोभव। यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव।।

भैरव पूजनम्

ॐ करकलितकपालः कुण्डली दण्डपाणिस्तरुणतिमिरनील व्यालयज्ञोपवीती। क्रतुसमयसपर्या विघ्नविच्छेद हेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम्।।

रुद्राय रौद्ररूपाय रणताण्डव शालिने। राज्योपद्रवनाशाय राज्यशान्ति विधायते।। सङ्कटत्राणकर्त्रे च सर्वसन्तापहारिणे। महाविघ्न विनाशाय वटुकाय नमो नमः।।

श्रीचक्रपूजन

ओं सौं त्रिपुरादेविं च विद्महे शक्तीश्वरीं च धीमहि तन्नो अमृता प्रचोदयात्।

ध्यान

या विद्या शिवकेशवादि जननी, या वै जगत् साक्षिणी।
या पञ्चप्रणवद्विरेफ नलिनी, या चित्कला मालिनी।।
या ब्रह्माण्ड पिपीलिकादितनुषुव्याप्ता जगत् मोहिनी।
सा अव्यात् पर देवता भगवती श्रीराजराजेश्वरी।।

कल्याणायुतपूर्ण बिम्बवदनां, पूर्णेश्वरा नन्दिनीम्
पूर्णापूर्ण पर-परेश महिर्षीं पूर्णामृतास्वादिनीम्।।
सम्पूर्णा परमोत्तमामृतकलां विद्यावर्तीं भारतीम्।
श्रीचक्रप्रिय विन्दु तर्पणपरां श्री राजराजेश्वरीम्।।

विनियोग

अस्य श्री त्रिपुरसुन्दरी मन्त्रस्य शिवर्षिः त्रिपाद विराट् छन्दः त्रिपुरसुन्दरी देवता कल्याणार्थं विनियोगः।। (कार्य हेतु मन में संकल्प कर जल छोड़ें।)

जल

ओं ह्रीं श्रीं क्लीं हः सौः महात्रिपुरसुन्दरी चक्रेश्वरी पादुकां पूजयामि नमः।।
ओं हंसः सोहं ऐं ह्रीं श्रीं शिवः श्रीचक्रस्य प्राणाः इह प्राणाः चक्रे सुखं चिरं तिष्ठन्तु।। (सर्वभूतहिते मातर्एहि एहि परमेश्वरी)

देवेशि भक्त सुलभे सर्वावरणसंयुते। यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव।।

जल का छींटा

कल्पयामि नमः पाद्यं अर्ध्यन्ते कल्पयाम्यहम्।

फूल आसन हेतु

सुगंधतैलाभ्यंगं मञ्जनशाला प्रवेशनम्।
कल्पयामि नमस्तास्मिन् मणिपीठोपवेशनम्।।

जल एवं चावल

हेम कुम्भ च्युतै-तीर्थैः कल्पयाम्यभिषेचनम्।

फूल एवं कलावा

हे देवि वरदे देवि दुकूलं अर्पयाम्यहम्।

अष्टगंध, रोली एवं चंदन

अष्टगंधैः समायुक्तं लेपनम् च ददाम्यहम्।

फूल एवं माला

मल्लिका मालती जाति चम्पकाभिर्मनोहरैः।
रचितां कुसुमैर्मालां कल्पयामि नमस्तव।।

पुष्प (आभूषण के लिए)

भूषणानि च दिव्यानि अर्पयामि सुधारय।

धूप

कालागुरु धूपेन धूपयामि वरानने।
घूपं गृहण देवेशि! सर्वसौख्यं विवर्धय।।

दीप

ज्योतिपुंज प्रभापूर्णम् सर्वत्र तिमिरापहम्।
दीपं ददामि हे देवि प्रसीद त्रिपुरेश्वरी।।

नैवेद्य

हेमपात्रगतं दिव्यं नैवेद्यं च परिष्कृतम्।
क्षुधाशान्तिकरम् सद्य गृहाण त्रिपुरेश्वरी।।

ताम्बूल

कर्पूरामोद लसितां परमोत्तम वीटिकाम्।
कल्पयामि महाभागे गृहाण परमेश्वरि।।

फल

इदं फल मयादेवि स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिः भवेत् जन्मनि जन्मनि।।

वन्दना

नमस्ते देव देवेशि नमस्त्रैलोक्यवंदिते।
नमः परशिवाङ्कस्थे नमस्त्रिपुरसुन्दरि।।
प्रणमामि महादेवी सर्वैच्छित फलप्रदाम्।
सर्वरक्षाकरं चक्र तत्राहं कल्पये सदा।।
सर्वसम्पत करी बन्दे भजे सर्वप्रियंकरीम्।
नमाम्यहं ततो देवि सर्वमंगलकारिणीम्।।
सर्वकामप्रदां बन्दे सर्वदुःख विमोचनीम्।
सर्वमृत्युप्रशमनीं सर्वविघ्ननिवारिणीम्।।
त्रिकोणेहं जगद्धात्रीं महाकामेश्वरीं भजे।

महाबज्रेश्वरीं बन्दे महात्रिपुरसुन्दरीम्।
सर्वशक्तिं नमस्यामि सर्वेश्वर्य प्रदां भजे।
सर्वानन्दमयीं वन्दे सर्वरक्षास्वरूपिणीम्।।

प्रजापामि महाविद्यांत्वत् प्रीत्यर्थमहं सदा।
तवविद्यां प्रजपत् पातु, नौमित्वां परमेश्वरीम्।।
तिष्ठ मे हृदये नित्यं त्रिपुरे परमेश्वरि।
जगदम्ब महाराज्ञि महाशक्तिं शिवप्रिये।।
यः पठेत् अष्टकं नित्यं महाकल्याणदायकम्।
प्रसीदति महादेवी श्रीमत् त्रिपुरसुन्दरी।।
श्रीचक्र पूजनात् तस्य सर्वकष्टं विनष्यति।
गृहे शान्ति सुखं सम्पत् स्थिरत्वं याति वैध्रुवम्।।

क्षमा याचना

साधुवासाधुवाकर्म यद्यदाचरितं मया।
तत् सर्वं कृपयादेवि गृहाणाराधनं मम।।
ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरी।
अज्ञानात् विस्मृतेर्भ्रान्त्या यन्यूनमधिकं कृतम्।
तत्सर्वं क्षम्यतां देवि प्रसीद चक्रवासिनि।।

मंत्र

ओं क ए ईल ह्रीं। ह स क ल ह्रीं सकल ह्रीं।

न शिवेन बिना शक्तिः, नहि शक्त्या बिना शिवः।
न तयोरन्तरं मन्ये, चन्द्रचन्द्रिकयोरिव।।

दुर्गापूजनम्

ध्यान

ॐ विद्युद्दाम समप्रभां मृगपतिस्कन्ध स्थितां भीषणां, कन्याभिः करवालखेट विलसद्धस्ताभिरा सेविताम्। हस्तैश्चक्र गदासिखेटविशिखांश्चापं गुणं तर्जनीं, बिभ्राणांमनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे।।

ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः श्री दुर्गां ध्यायामि।।

आवाहन

आगच्छ वरदे देवि, दैत्यदर्प निषीदिनि। पूजां गृहाण सुमुखि, नमस्ते शङ्कर प्रिये।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः श्री दुर्गा आवाहयामि।।

आसन

अनेकरत्नं संयुक्तं नानामणि गणान्वितम्। कर्तस्वरमयं दिव्यं आसनं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः आसनं समर्पयामि वा आसनार्थे अक्षतान् समर्पयामि।।

पाद्य

गङ्गादि सर्व तीर्थेभ्यो मया प्रार्थनयाहृतम्। तोयमेतत् सुखः स्पर्शं पाद्यार्थं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः पाद्यार्थे पाद्यं समर्पयामि।।

अर्घ्य

गन्धपुष्पाक्षतैर्युक्तं अर्घ्यं सम्पादितं मया। गृहाण त्वं महादेवि! प्रसन्ना भव

सर्वदा।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः अर्घ्यार्थे अर्घ्यं समर्पयामि।।

आचमन

आचम्यतां त्वया देवि, भक्तिं मे ह्यचलां कुरु ईप्सितं मे फलं देहि परत्र च परांगतिम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः आचमनार्थे आचमनीयं जलं समर्पयामि।।

स्नान

जाह्नवीतोय मानीतं शुभं कर्पूर-संयुतम्, स्नापयामि सुरश्रेष्ठे! त्वां पुत्रादि फलप्रदाम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः, स्नानार्थे स्नानीयं जलं समर्पयामि।।

दुग्ध

कामधेनु समुत्पन्नं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः स्नानार्थे स्नानीयं पयः समर्पयामि।।

शुद्धोदक स्नान

गङ्गा सरस्वती रेवा पयोष्णी नर्मदा जलैः। स्नापिताऽसि मयादेवी तथा शान्तिं कुरुष्व मे।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः शुद्धोदक स्नानं समर्पयामि।।

दधि

पयसस्तु समुद्भूतं मधुराम्लं शशि प्रभम्। दध्यानीतं महादेवी स्नानार्थं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः दधि स्नानं समर्पयामि।।

शुद्धोदक स्नान

गङ्गागोदावरी कृष्णाकावेरी जलमुत्तमम्। गृह्णीत मातृका यूयं, स्नानार्थ परिकल्पितम्।। ह्री साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः शुद्धोदक स्नानं समर्पयामि।।

घृत

नवनीत समुत्पन्नं सर्वसन्तोष कारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थ प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः घृतं स्नानं समर्पयामि।।

मधु

तरुपुष्प समुद्भूतं सुस्वादु मधुरं मधु। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः मधु स्नानं समर्पयामि।।

शर्करा

इक्षुसार समुद्भूता शर्करा पुष्टि कारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः शर्करा स्नानं समर्पयामि।।

पञ्चामृत

पयोदधि घृतं क्षौद्रं सितया च समन्वितम्। पञ्चामृतमनेनाद्य कुरु स्नानं दयानिधे।। ह्री साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः स्नानार्थे पञ्चामृत स्नानं समर्पयामि।।

शुद्धोदक स्नान

परमानन्द बोधाब्धि निमग्न निजमूर्तये। साङ्गोपाङ्ग इदं स्नानं कल्पयाम्यह

ईशिते।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः शुद्धोदकस्नानार्थे शुद्धोदकं जलं समर्पयामि।।

वस्त्र

वस्त्रञ्च सोमदैवत्वं लज्जायास्तु निवारणम्। मया निवेदिता भक्त्या गृहाण सर्वेश्वरि।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः परिधानार्थे वस्त्रं समर्पयामि।।

उपवस्त्र (कंचुकी या रक्तसूत्र)

यामाश्रित्य महामाया जगत् सम्मोहिनी सदा। तस्मै ते परमेशायै कल्पयाम्युत्तरीयकम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः उपवस्त्रार्थे उपवस्त्रं समर्पयामि।।

यज्ञोपवीत

काञ्चनं ब्रह्म सूत्रं च ब्रह्मणा निर्मितंपुरा। उपवीतं गृहाण त्वं परमेश्वरी नमोऽस्तुते।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः यज्ञोपवीतं समर्पयामि।।

मधुपर्क (कांसे की कटोरी में मधु-दधि व तुलसीपत्र)

दधिमध्वाज्य संयुक्तं पात्र युग्म समन्वितम्। मधुपर्क गृहाण त्वं वरदाभव शोभने।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः मधुपर्कं समर्पयामि।।

चन्दनं

मलयाचल सम्पन्नं नाना पन्नगरक्षितम्शीतलं बहुलामोदं चंदनं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः चंदनं समर्पयामि।।

गन्धं

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः गन्धार्थे गन्धं समर्पयामि।।

कुंकुम

कुंकुमं कान्तिदं दिव्यं कामनाकामसम्भवम्। कुंकुमं नोर्चिते देवि प्रसीद परमेश्वरी।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः कुंकुमं समर्पयामि।।

अक्षत

अक्षताश्च सुरश्रेष्ठाः कुंकुमाक्ताः सुशोभिताः। मया निवेदिता भक्त्या गृहाण परमेश्वरि।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः अक्षतार्थे अक्षतान् समर्पयामि।।

पुष्प

मन्दारपारिजातादि पाटलीकेतकानि च। जातीचम्पक पुष्पाणि गृह्णाणेमानि शोभने।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः पुष्पं समर्पयामि।।

पुष्पमाला

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयाऽऽहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः पुष्पमालार्थे पुष्पमालां समर्पयामि।।

दूर्वा

त्वं दूर्वेऽमृत जन्मासि वन्दितासि सुरैरपि। सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः दुर्वां समर्पयामि।।

विल्वपत्र

अमृतोद्भवः श्रीवृक्षो महादेवि! प्रियः सदा। विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरी।। ह्रीं साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्तिकायै श्री दुर्गायै नमः विल्वपत्रं समर्पयामि।।

अबीर

अबीरं च गुलालं च चोवा चन्दनमेव च।
अबीरेण अर्चिता देवी गृह्यतां परमेश्वरि।।

सिन्दुर

सिन्दूरं अरुणाभासं जपाकुसुम सन्निभम्।
अर्चितासि मयादेवी प्रसीद परमेश्वरि।। सिन्दूरं समर्पयामि।

कज्जल

चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारिके।
कर्पूरज्योतिः उत्पन्नं गृहाण परमेश्वरि।। कज्जलं समर्पयामि।

सौभाग्यद्रव्य

सौभाग्यसूत्रं वरदे सुवर्णमणि संयुते।
कण्ठे बध्नामि देवेशि सौभाग्यं देहि मे सदा।।
सौभाग्य द्रव्यार्थे विविध सौभाग्य द्रव्याणि समर्पयामि।।

आभूषण

हार-कङ्कण-केयूर मेखला कुण्डलादिभिः।
रत्नाढ्यं कुण्डलोपेतु भूषणं प्रतिगृह्यताम्।। भूषणं समर्पयामि।

इत्र

चन्दनागरुकर्पूरकुंकुमं रोचनं तथा।
कस्तूर्यादिसुगन्धैश्च सर्वाङ्गेषु विलेपनम्।।

हल्दी

हरिद्रारञ्जिते देवि सुखसौभाग्यदायिनि।
तस्मात्त्वां पूजयाम्यत्र दुःखशान्ति प्रयच्छ मे।।

पटवासम्

पटवस्त्र सुवासार्थ पटवासमिमं शुभम्।
कंकुमेनारूणं दतं सर्वासद्धिप्रदा भव।। पटवासं समर्पयामि।।

धूप

दशाङ्ग गुग्गुलं धूपं चन्दनागरु संयुताम्।
समर्पितं मयां भक्त्या महादेवि प्रतिगृह्यताम्।। धूपार्थे धूपं माघ्रापयामि।

दीपं

घृतवर्ति समायुक्तं महातेजो महोज्वलम्।
दीपं दास्यामि देवेशि! सुप्रीता भव सर्वदा।।
दीपार्थे प्रत्यक्ष दीपं दर्शयामि।।

नैवेद्य

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्।
नैवेद्यं गृह्यतां देवि! भक्तिं मे ह्यचलां कुरु।। नैवेद्यार्थे नैवेद्यं समर्पयामि।।

फल

द्राक्षा खर्जूर कदली पनसाम्र कपित्थकम्।
नारिकेलेक्षु-जम्ब्वादि फलानि प्रतिगृह्यताम्।।
इदं फलं मया देवि स्थापितं पुरतस्तव।
तेन ये सफलांवाप्तिः भवेज्जन्मनि जन्मनि।।
ऋतुफलार्थे ऋतुफलानि समर्पयामि।।

आचमन

कामारिवल्लभे देवि कुर्वाचमनमंबिके।
निरन्तरमहं वन्दे चरणौ तव चण्डिके।।

ताम्बूल

एला लवङ्गः कस्तूरी कर्पूरैः पुष्पवासिताम्।
वीटिकां मुख वासार्थे अर्पयामि सुरेश्वरि।।
मुखशुद्ध्यर्थे ताम्बूलपत्रं-पूंगीफलं च समर्पयामि।।

दक्षिणा

पूजाफलं समृद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि।
स्थापितं तेन मे प्रीता पूर्णान् कुरु मनोरथान्।।
साद्गुण्यार्थे द्रव्य दक्षिणां समर्पयामि।।

कर्पूर-नीराजन

नीराजनं सुमाङ्गल्यं कपूरेण समन्वितम्।
चन्द्रार्कवह्नि सदृशं दुर्गेदेवि! नमोऽस्तुते।।
नीराजनार्थे कर्पूर नीराजनं समर्पयामि।।

पुष्पांजलि

दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः। स्वस्थैः स्मृता मतिमतीव शुभां ददासि।। दारिद्र्य दुःखभयहारिणि का त्वदन्या, सर्वोपकार करणाय सदाऽऽर्द्रचित्ता।। मन्त्र पुष्पाञ्जलिं समर्पयामि।।

प्रदक्षिणा

नमस्ते देवि! देवेशि! नमस्ते ईप्सितप्रदे।
नमस्ते जगतां धात्रि! नमस्ते भक्तवत्सले।।
यानि कानि च पापानि ज्ञाताज्ञात कृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणा पदे-पदे।।

साष्टाङ्ग प्रणाम

नमः सर्व हितार्थाय जगदाधार हेतवे।
साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः।।

क्षमा याचना

आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षमस्व जगदीश्वरि।।
मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि! यथायोग्यं तथा कुरु।।
पुत्रान् देहि धनं देहि सौभाग्यं देहि मङ्गले।
अन्याश्च सर्वकामांश्च देहि देवि! नमोऽस्तुते।।

आरती

चन्द्रादित्यौ च धरणी च विद्युदग्निस्तथैव च।
त्वमेव सर्वज्योर्तींषि आर्तिक्यं प्रतिगृह्यताम्।।
ॐ कालाभ्राभां कटाक्षैरकिुलभयदां मौलिबद्धेन्दुरेखां,
शंख चक्रं कृपाणं त्रिशिरवमपि करैरुद्वहन्तीं त्रिनेत्राम्।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं।
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः।।
या विद्याशिव केशवादि जननी या वै जगत् साक्षिणि,
या पञ्चप्रवणद्विरेफ नलिनी या चित्कला मालिनी।
या ब्रह्मादि पिपीलिकान्ततनुषुव्याप्ता जगत् मोहिनी।
सा अव्यात् पर देवता भगवती श्री राजराजेश्वरी।।
कल्याणायत्पूर्ण विम्बवदनां पूर्णेश्वरा नंदिनीम्,
पूर्णापूर्ण परा परेश महिर्षीं पूर्णामृतास्वादिनीम्।
सम्पूर्णां परमोत्तमाममृतकलां विद्यावर्तीं भारतीम्।
श्री चक्रप्रिय बिन्दु तर्पणपरां श्री राजराजेश्वरीम्।।

पुस्तक पूजा

ॐ नमः पिशाचिनि करंकिनि त्रिशूल खड्ग हस्ते सिंहारूढ़े एह्येहि आगच्छ आगच्छ इमां पूजां गृहाण श्री सप्तसती स्वरूपिण्यै ह्रीं चंडिकायै नमः।।

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।।

ध्यात्वां देवीं पञ्चपूजां कृत्वा योन्या प्रणम्पच।
आधारं स्थाप्य मूलेन स्थापयेतत्र पुस्तकम्।।

माला

ॐ मां माले महामाये सर्वशक्ति स्वरूपिणि।
चतुवर्गस्त्वयिन्यस्तस्तस्मान्मे सिद्धिदा भव।।
ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे।
जपकाले च सिद्धयर्थं प्रसीद मम सिद्धये।।
ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्वमन्त्रार्थ साधिनि
साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा।।
।। ऐं ह्रीं अक्षमालिकायै नमः।।
ॐ त्वं माले सर्व देवानां प्रीतिदा शुभदाभव।।
शिवं कुरुष्व मे भद्रे यशोवीर्यं च सर्वदा।। ।। ॐ ह्रीं सिद्धयै नमः।।

शापोद्धार (सात बार आदि एवं अन्त में)

ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चण्डिकादेव्यै शापनाशानुग्रहं कुरु कुरु स्वाहा।।

उत्कीलनम् (आदि एवं अन्त में 21-21 बार)

ॐ श्री क्लीं ह्रीं सप्तशती चण्डिकां (चण्डिके) उत्कीलनं कुरु कुरु स्वाहा।।

मृत संजीवनी (सात बार आदि में जपना)

ॐ ह्रीं ह्रीं वं वं ऐं ऐं मृत संजीवनि विद्या (विद्ये) मृतमुत्थापयोत्थापय क्रीं ह्रीं ह्रीं वं स्वाहा।।

शापविमोचन (मरीच कल्पोक्त के अनुसार - 108 बार जप)

ॐ श्रीं श्रीं क्लीं हूं ॐ ऐं क्षोभय मोहय उत्कीलय उत्कीलय उत्कीलय ठं ठं।।

नवार्ण विधि (108 बार पाठ के आदि और अन्त में)

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे।।

सप्तसती पाठ

1. चण्डिका शापविमोचन 2. कवच-अर्गला-कीलक, 3. अथ वेदोक्तं रात्रिसूक्तम अथ तन्त्रोक्त रात्रिसूक्तम, 4. श्री देव्यथर्वशीर्षम् 5. सिद्ध कुञ्जिका स्तोत्रम्, 6. सप्तशती न्यास 7. नवार्ण विधि, 8. पाठ - 13 अध्याय (104, 69, 44, 42, 129, 24, 27, 63, 41, 32, 55, 41, 30 = 7011), 9. नवार्णजप 10. नवार्ण विधि, 11. चण्डिका शापविमोचन, 12. ऋग्वेदोक्त देवीसूक्तम, 13. अथ तन्त्रोक्त देवीसूक्तम्, 14. अर्थप्राधानिकं रहस्यम् 15. दुर्गाद्वास्त्रिंन्तामाला 16. सिद्ध कुञ्चिकास्तोत्रम्, 17. क्षमा प्रार्थना, 18. देव्यपराध क्षमापनस्तोत्रम् 19. आरती, 20. हवन।

क्षमा-प्रार्थना

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दना। यत्पूजितं मया देवी परिपूर्ण तदस्तु मे। यदक्षर पदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरी। पुत्रान्देहि धनं देहि सौभाग्यं देहि मंगले। अन्याश्च सर्वकामांश्च देहि देवि नमोऽस्तुते।। सर्वेभ्यो देवेभ्यो नमः।।

अष्टमी को हवन

हवन कुण्ड में "ॐ रँ" लिखें।

1. लघु पूजा से, 2. दुर्गा सप्तशती के तेरह अध्याय से।

अथ आचमनमन्त्राः

ओऽम् अमृतोपस्तरणमसि स्वाहा (1) इससे एक।

ॐ अमृतापिधानमसि स्वाहा (2) इससे दूसरा।

ॐ सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा (3) इससे तीसरा आचमन करके तत्पश्चात् जल लेकर नीचे लिखे मन्त्रों से अंग स्पर्श करें।

अंग स्पर्श मन्त्राः।।

ॐ वाङ्मे आस्येऽस्तु।। इस मंत्र से मुख

ॐ नसोर्मे प्राणोऽस्तु।। इस मंत्र से नसिका के दोनों छिद्र

ॐ अक्ष्णोर्मे चक्षुरस्तु।। इस मंत्र से दोनों आंखें

ॐ कर्णयोर्मे श्रोत्रमस्तु।। इस मंत्र से दोनों कान

ॐ वाहूवोर्मे वलमस्तु।। इस मंत्र से दोनों बाहु

ॐ ऊर्वोर्मे ओजोऽस्तु।। इस मंत्र से दोनों जंघा और

ॐ आरिष्टानि मेऽङ्गानि तनूस्तन्वा में सह सन्तु।। इस मंत्र से दाहिने हाथ से जल स्पर्श करके मार्जन करना।

।। प्रार्थनोपासना मंत्राः।।

ॐ विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रन्तन्न आ सुव।। १।।

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।। २।।

ॐ य आत्मदा वलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य च्छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम।। ३।।

यः प्राणतो निमिषतो महित्वैकेद्राजा जगतो वभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ।। ४।।

ॐ येन द्यौरूग्रा पृथ्वी च दृढा येन स्वस्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।। ५।।

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्तेजुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।। ६।।

ॐ स नो बन्धुर्जनिता स विधाता धामानि वेद भुव नानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैर यन्त।। ७।।

ॐ अग्ने नयसुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।। ८।

।। अग्नि स्थापन ।।

ॐ भूर्भुवः स्वः

इस मंत्र से यज्ञ कुण्ड में अग्नि रखें।

ॐ भूर्भुवः स्वर्द्योरिव भूम्ना पृथिवीव वरिम्णा तस्यास्ते पृथिवि
देवयजनि पृष्ठेऽग्नि मन्नादमन्नाद्यायादधे ।।

इस मंत्र से कपूररधर, अगला मंत्र पढ़ के अग्नि प्रदीप्त करें। मंत्र है -

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्ठापूर्ते संहंससृजेथामयं च।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ।। समिधा घी
में भिगाकर रखें। मंत्र पढ़ें

ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्धय चास्मान्
प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। इद्मग्नये जातवेदसे।
इदं न मम ।। १ ।।

इससे पहली समिधा अग्नि में डाले।

ॐ समिधाग्निं दुवस्यत धृतैर्बोधयातातिथिम्।
आस्मिन् हव्या जुहोतनस्वाहा। इदमग्नये। इदन्नमम ।। २ ।।

इससे तथा

सुसमिद्धाय शोचिषे धृतं तीब्रं जुहोतन! अग्नये जातवेदसे स्वाहा।
इदमग्नये जातवेदसे । इदन्न मम ।। ३ ।।

इससे दूसरी समिधा अग्नि में रखें।

तन्त्र्वा समिद्भिरंगिरो धृतेन वर्द्धयामसि। बृहच्छोचा यविष्ठय स्वाहा ।।
इदमग्नयेऽगिरसे। इदं न मम ।। ४ ।।

इससे तीसरी समिधा अग्नि में रखें। पुनः 5 बार घृताहुति नीचे लिखे मंत्र से देना।

ॐ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसे न्नानाद्येन समेधय स्वाहा। इदं जातवेदसे।

इदं न मम ।। १।।

(इसी मंत्र से 5 बार आहुति दें।)

तत्पश्चात् अञ्जलि में जल लेकर वेदी के पूर्व दिशा आदि की ओर जल छिड़कावें, इसके ये मंत्र हैं -

ॐ अदितेऽनुमन्यस्व।। इस मंत्र से पूर्व में

ॐ अनुमतेऽनुमन्यस्व।। इससे पश्चिम में

ॐ सरस्वत्यनुमन्यस्व।। इससे उत्तर में और नीचे लिखे मंत्र से वेदी के चारों ओर जल छिड़कावें।

ॐ देवसवितः प्रसुवयज्ञंप्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केत नः पुनातु वाचस्पतिर्वाचं नः स्वदतु।।

इसके पश्चात् होम के आदि और अंत में जो आहुति दी जाती है, उनमें से यज्ञ कुण्ड के उत्तर भाग में एक आहुति और यज्ञकुण्ड के दक्षिण भाग में दूसरी आहुति देनी चाहिए और जो कुंड के मध्य में आहुतियां दी जाती हैं उनका नाम 'आज्यभागाहुति' है। पुनः स्रुवा में घी भरकर अंगूठा तर्ज्रनी मध्यमा में पकड़कर आहुति देना।

ॐ अग्नये स्वाहा। इदमग्नये इदं न मम।।

इस मंत्र से वेदी के उत्तर भाग में

ॐ सोमाय स्वाहा। इदं सोमाय। इदं न मम।।

इस मंत्र से वेदी के दक्षिण भाग में प्रज्ज्वलित समिधा पर आहुति देनी चाहिए, तत्पश्चात्

ॐ प्रजापतये स्वाहा। इदं प्रजापतये। इदं न मम।।
ॐ इन्द्राय स्वाहा। इदमिन्द्राय। इदं न मम।।

इन दो मंत्रों से वेदी के मध्य में दो आहुति देना। पुनः प्रातःकाल प्रधान होम की आहुति नीचे लिखे मंत्र से देना।

ॐ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा।। १।।

ॐ सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।। २।।

ॐ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा।। ३।।

ॐ सजूर्देवेन सावित्रा सजूरूषसेन्द्रवत्या जुषाणः सूर्यो वेतु स्वाहा।। ४।।

अब निम्नलिखित मंत्रों से प्रातः सायं आहुति देनी चाहिए। पुनः रात्रिकाल के लिए आहुति देना हो तो नीचे लिखे मंत्र से आहुति देना -

ॐ भूरग्नये प्राणाय स्वाहा। इदमग्नये प्राणाय। इदं न मम।। १।।

ॐ भुर्वायवेऽपानाय स्वाहा। इदं वायवेऽपानाय इदं न मम ।। २।।

ॐ स्वरादित्याय व्यानाय स्वाहा। इदमादित्याय व्यानाय। इदं न मम ।। ३।।

इदं भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा। इदमग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः। इदं न मम ।। ४।।

ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् स्वाहा।। ५।।

ॐ यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरू स्वाहा।। ६।।

ॐ विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तन्न आसुव स्वाहा।। ७।।

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा ।। ८।।

आहिताग्नि होम

अब नीचे लिखे मन्त्र से सायंकाल में अग्निहोम को जानो

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा।। १।।

ॐ अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा।। २।।

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा।। ३।।

इस तीसरे मंत्र को मन से उच्चारण करके तीसरी आहुति देनी चाहिए।

(ॐ सजूर्देवेन सवित्रा सजूरातेन्द्रवत्या जुषाणो अग्निर्वेत्तु स्वाहा।।
४।।)

इससे तीन पूर्णाहुति देवें

ॐ भुर्वायवे स्वाहा ।। इदं वायवे। इदं न मम।।
ॐ स्वरादित्याय स्वाहा। इदमादित्याय।। इदं न मम।।
ॐ भूर्भुवः स्वरग्निवाय्वादित्येभ्यः स्वाहा।।
इदमग्निवाय्वादित्येभ्यः इदं न मम।।

पुनः स्विष्ट कृत (अच्छाई के लिए) नीचे लिखे मंत्र से मीठे की आहुति देवें

ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् अग्निष्टत्स्विष्ट कृद्विद्यात्सर्वं स्विष्टं सुहुतंकरोतु मे अग्नये स्विष्ट कृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहा। इदमग्नये स्विष्टकृते। इदं न मम।

मीठे की या खीर या किसी भी मिष्ठान्न से आहुति देना पुनः घृत की चार आहुति देना।

आज्याहुति मंत्राः

ॐ भूर्भुवः स्वः। अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्वदुच्छुनांॐ स्वाहा। इदमग्नये पवमानाय। इदन्नमम। १।

ॐ भूर्भुवः स्वः। अग्नि ऋषिः पवमानः पाञ्चजन्यः पुरोहितः तमीमहे। महागयं स्वाहा।। इदमग्नये पवमानाय। इदन्नमम । २।

ॐ भूर्भुवः स्वः। अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं पोषं स्वाहा।।

इदमग्नये पवमानाय ।। इदन्न मम ।। ३।।

ॐ भूर्भुवः स्वः। प्रजापते न त्व देतान्यन्यो विश्वाजातानि परिता वभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु बयं स्याम पतयो रयीणां ॐ स्वाहा। इदं प्रजापतये। इदन्न मम ।। ४।।

इनसे घृत की चार आहुति देना यदि मंगलकार्य के लए विशेष आहुति देना चाहें तो नीचे लिखे हुए 8 मंत्रों से आहुति देना।

अष्टाज्याहुति मन्त्राः

ॐ त्वं नो अग्ने वरूणस्य विद्वान् देवस्य हेलोऽव यासिसीठाः। यजिठो वह्निनतमःशीशुचानो विश्वा द्वेषांसि प्रमुमुऽध्यस्मत् स्वाहा। इदमग्निवरूणाभ्याम्। इदन्नमम। १।

ॐ सत्वं नो अग्नेऽवमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरूणं रराणों व्रीहिमृडीकं सुहवो न एधि स्वाहा।। इदमग्निवरूणाभ्याम् इदन्न मम।। २।।

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युरा चके स्वाहा।। इदं वरूणाय । इदन्न मम।। ३।।

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरूणेह वोध्युरू शंस मा न आयुः प्रमोषीः स्वाहा। इदं वरूणाय। इदन्न मम।। ४।।

ॐ ये ते शतं वरूण ये सहस्रो यज्ञियाः पंशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्धर्विश्वे मुन्चन्तु मरूतः स्वर्क्काः स्वाहा। इदं वरूणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरूद्भ्यः स्वर्क्केभ्यः। इदं न मम।

ॐ अयाश्चाग्नेऽस्य नभिशस्तिपाश्च सत्यमित्त्वमयासि अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा। इदमग्नये अयसे इदन्न मम।। ६।।

ॐ उदुत्तमं वरूण पाशमस्म दवाधमं विमध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा।। इदं वरूणायादित्याय अदितये च इदन्न मम।। ७।।

ॐ भवतन्नः समनसौ सचेतसावरेपसौ ऽ मा यज्ञं हि सिष्ठं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः स्वाहा।।
इदं जातवेदाभ्याम्। इदन्न मम।। ८।।

इसके पश्चात् पूर्णाहुति के पूर्व ही 108 ललिता, राजराजेश्वरी त्रिपुरसुन्दरी के नामों से हवन करना।

श्रीः

ललितेश्वरी पातु वः

त्रिपरसुन्दरि ललिताष्टोत्तर शत नामिका

स्वाहा सबमें लगाकर आहुति दें।

१. ॐ श्रीः मात्र्यै नमः स्वाहा

२. ॐ श्रीः महाराज्ञ्यै नमः

३. ॐ श्रीः मत्सिंहासनेश्वर्यै नमः

४. ॐ चिदग्निकुण्डसंभूतायै नमः

५. ॐ देवकार्य समुद्यतायै नमः

६. ॐ उद्यद्भानुसहस्त्राभायै नमः

७. ॐ चतुर्वाहुसमन्वितायै नमः

८. ॐ रागस्वरूपाशाढ्यायै नमः

९. ॐ क्रोधाकारांकुशोज्जवलायै नमः

१०. ॐ मनोरूपेक्षुकोदण्डायै नमः

११. ॐ पञ्चतन्मात्रसायकायै नमः

१२. ॐ सर्वारूणायै नमः

१३. ॐ सर्वाभरणभूषितायै नमः

१४. ॐ शिवायै नमः

१५. ॐ चिन्तामणिगृहान्तः स्थितायै नमः

१६. ॐ कदम्बवनवासिन्यै नमः

१७. ॐ कामाक्ष्यै नमः

१८. ॐ मूलमन्त्रात्मिकायै नमः

१६. ॐ कुलांगनायै नमः

२०. ॐ कौलिन्यै नमः

२१. ॐ कुलयोगिन्यै नमः

२२. ॐ अकुलायै नमः

२३. ॐ मूलाधारैकनिलयायै नमः

२४. ॐ ब्रह्मग्रन्थिविभेदिन्यै नमः

२५. ॐ मणिपूरान्तरूदितायै नमः

२६. ॐ विष्णुग्रन्थि विभेदिन्यै नमः

२७. ॐ आज्ञाचक्रान्तरालस्यायै नमः

२८. ॐ रूद्रग्रन्थि विभेदिन्यै नमः

२६. ॐ सहस्त्राम्बुजारूढायै नमः

३०. ॐ सुधासाराभिवर्षिण्यै नमः

३१. ॐ तडिल्लतासमरूच्यै नमः

३२. ॐ पट्चक्रोपरिसंस्थितायै नमः

३३. ॐ महाशक्तयै नमः

३४. ॐ कुण्डलिन्यै नमः

३५. ॐ विसतन्तुतनीयस्यै नमः

३६. ॐ भक्तसौभाग्यदायिन्यै नमः

३७. ॐ शर्वाण्यै नमः

३८. ॐ श्रीकर्यै नमः

३९. ॐ शान्तिमत्यै नमः

४०. ॐ निर्मलायै नमः

४१. ॐ नित्यायैनमः

४२. ॐ निराकुलायै नमः

४३. ॐ निर्गुणायै नमः

४४. ॐ नित्यमुक्तायै नमः

४५. ॐ सर्वेश्वर्यै नमः

४६. ॐ सर्वमन्त्रस्वरूपिण्यै नमः

४७. ॐ सर्वयन्त्रात्मिकायै नमः

४८. ॐ सर्वतन्त्ररूपायै नमः

४९. ॐ माहेश्वर्यै नमः

५०. ॐ महादेव्यै नमः

५१. ॐ महालक्ष्म्यै नमः

५२. ॐ महापातकनाशिन्यै नमः

५३. ॐ महाशक्त्यै नमः

५४. ॐ महेश्वर्यायै नमः

५५. ॐ महातन्त्रायै नमः

५६. ॐ महामन्त्रायै नमः

५७. ॐ महायन्त्रायै नमः

५८. ॐ महासनायै नमः

५९. ॐ महाभैरव पूजितायै नमः

६०. ॐ महात्रिपुरसुन्दर्यै नमः

६१. ॐ चारूहासायै नमः

६२. ॐ चराचरजगन्नाथायै नमः

६३. ॐ चक्रराजनिकेतायै नमः

६४. ॐ भगमालिन्यै नमः

६५. ॐ पद्मासनायै नमः

६६. ॐ पुरूषार्थप्रदायै नमः

६७. ॐ पूर्णायै नमः

६८. ॐ अम्बिकायै नमः

६९. ॐ नारायिण्यै नमः

७०. ॐ ह्रींकायै नमः

७१. ॐ कल्याण्यै नमः

७२. ॐ कलावत्यै नमः

७३. ॐ वरदायै नमः

७४. ॐ वेदविद्यायै नमः

७५. ॐ विन्ध्याचलनिवासिन्यै नमः

७६. ॐ विजयायै नमः

७७. ॐ वाग्वादिन्यै नमः

७८. ॐ पशुपाशविमोचिन्यै नमः

७९. ॐ सदाचारप्रवृत्तिकायै नमः

८०. ॐ चित्यै नमः

८१. ॐ परायै नमः

८२. ॐ परदेवतायै नमः

८३. ॐ जयायै नमः

८४. ॐ विन्दुमण्डलवासिन्यै नमः

८५. ॐ सद्यः प्रसादिन्यै नमः

८६. ॐ मूलप्रकृत्यै नमः

८७. ॐ चिच्छक्त्यै नमः

८८. ॐ गायत्र्यै नमः

८९. ॐ कुरुकुल्लायै नमः

९०. ॐ कुलकुण्डलायै नमः

९१. ॐ वज्रेश्वर्यै नमः

९२. ॐ सिद्धेश्वर्यै नमः

९३. ॐ पराशक्त्यै नमः

९४. ॐ आत्मविद्यायै नमः

९५. ॐ श्रीविद्यायै नमः

९६. ॐ गुरूमूर्त्यै नमः

९७. ॐ योगानन्दायै नमः

९८. ॐ इच्छाशक्ति ज्ञानशक्ति क्रियाशक्तिस्वरूपिण्यै नमः

९९. ॐ राजराजेश्वर्यै नमः

१००. ॐ परमन्त्र विभेदिन्यै नमः

१०१. ॐ यज्ञप्रियायै नमः

१०२. ॐ धनधान्य विवर्धिन्यै नमः

१०३. ॐ विन्दुतर्पणसन्तुष्टायै नमः

१०४. ॐ त्रिपुराम्बिकायै नमः

१०५. ॐ श्री चक्रराजनिलयायै नमः

१०६. ॐ श्रीमत् त्रिपुरसुन्दर्यै नमः

१०७. ॐ ऐं ह्रीं श्रीं ललिताम्बिकायै नमः

१०८. ॐ मोहनाशिन्यै नमः

दुर्गा सप्तशती के तेरह अध्याय से हवन

<u>अन्त में</u> (प्रत्येक मंत्र 11-11 आहुति)

ॐ भूर्भुवः सुवः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्। ॐ स्वाहा।।

ॐ हों जूं सः ॐ भूर्भुवः स्वः
ॐ त्र्यम्बकंयजामहे सुगन्धिम्पुष्टिवर्द्धनम्।
उर्वारुकमिव वन्धनान्मृत्योर्मुक्षीय मामृतात्।।

ॐ सः जूं हों ॐ स्वः भुवः भूः।। ॐ स्वाहा।।

ॐ हिरण्यवर्णा हरिणीं सुवर्णरजतस्त्रजां चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह।। ॐ स्वाहा।।

ॐ हीं वं वटुकाय आपदु द्धरणाय कुरु कुरु वटुकाय हीं ॐ।। स्वाहा।।

ॐ ऐं हीं क्लीं चामुण्डाये विच्चे।। ॐ स्वाहा।।

ॐ सूर्याय नमः स्वाहा। ॐ चन्द्राय नमः स्वाहा। ॐ भौमाय नमः स्वाहा। ॐ बुधाय नमः स्वाहा। ॐ वृहस्पतये नमः स्वाहा। ॐ शुक्राय नमः स्वाहा। ॐ शनैश्चराय नमः स्वाहा। ॐ राहवे नमः स्वाहा। ॐ केतवे नमः स्वाहा। श्रीमन्महागणाधिपतये नमः स्वाहा। लक्ष्मीनारायणाभ्यां नमः स्वाहा। उमामहेश्वराभ्यां नमः स्वाहा। वाणीहिरण्यगर्भाभ्यां नमः स्वाहा। शचीपुरन्दराभ्यां नमः स्वाहा। मातृपितृचरणकमलेभ्यो नमः स्वाहा। इष्टदेवताभ्यो नमः स्वाहा। कुलदेवताभ्यो नमः स्वाहा। गुरुचरणकमलेभ्यो नमः स्वाहा। वासुदेवताभ्यो नमः स्वाहा। स्थानदेवताभ्यो नमः स्वाहा। सर्वेभ्योदेवेभ्यो नमः स्वाहा। सवेभ्योब्राह्मणेभ्यो नमः स्वाहा।।

क्षेत्रपाल-बलिदान

क्षेत्रपाल

ॐ अद्येत्यादि वास्तुकर्मणः साङ्गतासिद्ध्यर्थ क्षेत्रपालाय पूजनपूर्वकं बलिदान महं करिष्ये। ॐ न हि स्पशमित्यस्य विश्वामित्र ऋषिस्त्रिष्टुप्छन्दः क्षेत्रपालो देवता, क्षेत्रपालपूजने बलिदाने च विनियोगः।

कर कलित कपालः कुण्डली दण्डपाणिः तरुण तिमिर नील व्याल यज्ञोपवीती। क्रतु समय सपर्या विघ्न विच्छेद हेतु जयति वटुकनाथ सिद्धिदः साधकानाम्।।

ॐ भूर्भुवः स्वः, क्षं क्षेत्रपालाय नमः। क्षेत्रपालमावाहयामि स्थापयामि। ॐ क्षेत्रपालाय नमः। सम्पूजयेत।।

ॐ नमामि क्षेत्रपाल। त्वां भूतप्रेतगणाऽधिप। पूजां बलिं गृहाणेमं, सौम्योभवतु सर्वदा। आयुरारोग्यतां देहि, निर्विघ्नं कुरु सर्वदा।।

ध्यान

ॐ यं यं यं यक्षरूपं दशदिशिवदनं भूमि कम्पायमानं सं सं संहारमूर्ति शिरमुकुटजटाशेखरं चन्द्र विम्बाम् दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालं, पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम्।। ॐ नमो क्षेत्रपाल। दिव्याश्ववाहन! भूतप्रेत पिशाचशाकिनी-डाकिनीवेतालादि परिवृत! दधिभक्तभक्षक! मदीयां पूजां गृहाण। अनया पूजयां श्रीक्षेत्रपाल प्रीयताम्। क्षेत्रपालाय साङ्गाय सपरिवाराय दीर्घकेशाय भूतप्रेतपिशाचवेतालादि संयुताय सायुधाय सशक्तिकाय सवाहनाय, इमं सदीपमाषभक्तदध्योदनादिबलिं समर्पयामि। भो क्षेत्रपाल! दिशं रक्ष, बलिं भक्ष मम समस्त परिवारस्य कल्याणं सौख्यञ्च कुरु कुरु, आयुःकर्त्ता, क्षेमकर्त्ता, शान्तिकर्त्ता, पुष्टिकर्त्ता, तुष्टिकर्त्ता, निर्विघ्नकर्त्ता, वरदो भव।।

बलिदान

ॐ अद्येत्यादि कृतस्यास्य गृहवास्तुशान्तिकर्मणि साङ्गतासिद्ध्यर्थं दिग्पालपूजनपूर्वकं स्थापितदेवताभ्यो बलिदानंमहं करिष्ये।।

पूजन

भो दशदिग्पालदेवाः! साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्ध धुपचारैः वोऽहं पूजयामि। दशदिग्पालदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि। भो दशदिग्पाला साङ्गा सपरिवाराः सायुधाः सशक्तिकाः! इमं बलिं गृह्णीत मम सकुटुम्ब-स्याऽभ्युदयङ्कुरुत! आयुः कर्तारः क्षेम कर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाभवत। एभिर्बलिदानैर्दशदिग्पालाः प्रीयन्ताम्।। सम्पूजयते।।

खड्ग पूजन

ॐ पशुपाशाय विद्महे, विश्वकर्म्मणे च धीमहि तन्नो जीवः प्रचोदयात्।। ततः।। ॐ ह्रीं कालि कालि वज्रेश्वरि लौहदण्डायै नमः।। खड्गं प्रपूजयेत।। ॐ हूँ वागीश्वरीब्रह्मभ्यां नमः। ॐ हूँ लक्ष्मीनारायणाभ्यां नमः। ॐ हूँ उमामहेश्वराभ्यां नमः। ॐ ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः।।

प्रणमेत्

ॐ खड्गाय खरशाणाय शक्तिकार्य्यार्थतत्परः।
पशुश्छेद्यस्त्वया शीघ्रं, खड्गनाथ "नमोऽस्तुते"।।

संकल्प

ॐ तत्सद्यामुकदेवताप्रीतिकामोऽमुकदेव्यै इमं बलिं (पशुं) तुभ्यमहं सम्प्रददे।। ।। यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्।। ॐ हूं फट्।।

हूं बां बटुकाय नमः (वायब्ये), हूं यां योगिनीभ्यो नमः (ईशाने)
हूं क्षं क्षेत्रपालाय नमः (नैऋत्यां), हूं गं गणपतये नमः (अग्नि)

पूर्णाहुति

ओं पूर्णादर्वि परापत सुपूर्णा पुनरापत।
वस्नेव विक्रीडा वहा इष मूर्जद्धं शतक्रतोः स्वाहा।।
ओं पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ओं सर्वं वै पूर्णं द्धंस्वाहा - 3।।

वसोर्धारा

ॐ वसोः पवित्रमसि शतधारम्, वसोः पवित्रमसि सहस्त्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वां कामधुक्षः स्वाहा।।

साष्टाङ्ग प्रणाम

आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षमस्व परमेश्वरि।।
मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि! यथायोग्यं तथा कुरु।।
पुत्रान् देहि धनं देहि सौभाग्यं देहि मङ्गले।
अन्यांश्च सर्वकामांश्च देहि देवि! नमोऽस्तुते।।

प्रदक्षिणा

नमस्ते देव! देवेशि! नमस्ते ईप्सित प्रदे।
नमस्ते जगतां धात्रि! नमस्ते भक्तवत्सले।।
यानि कानि च पापानि ज्ञाताज्ञात कृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणा पदे-पदे।।

पूर्णपात्र दानम्

अस्मिन् श्री दुर्गाहवन कर्मणि श्री महाकाली महालक्ष्मी महासरस्वती दुर्गादेवि प्रीत्यर्थमिदं पूर्णपात्रं अमुक गोत्र अमुक शर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।।

कलश विसर्जन

ॐ महामाये! जगन्मातः सर्व काम प्रदायिनि!।
ददामि नारिकेल (कूष्मांड) (बलिः) प्रसीद वरदाभव।।
ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा।। ॐ उदानाय स्वाहा।।
ॐ व्यानाय स्वाहा।। ॐ समानाय स्वाहा।।

विसर्जन

इमां पूजां मयादेवि यथाशक्त्योपपादिताम् रक्षार्थ त्वं समादाय ब्रज स्थानमनुत्तमम्।। गच्छन्तु च सुरश्रेष्ठीः स्वस्थानं परमेश्वरी यजमान हितार्थाय पुनरागमनाय च।।

तिलक

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोहैपह्वये श्रियम्।।

मौली

येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वामनुवध्नामि रक्षे मा चल मा चल।।

आशीर्वाद

मंत्रार्थाः सफलाः सन्तु पूर्णासन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोस्तु मित्राणामभ्युदयस्तथां।।
धान्यं धनं पशुं बहुपुत्रलाभं शत संवत्सरं दीर्घमायुः।।

यज्ञ प्रार्थना

पूजनीय प्रभो हमारे भाव उज्जवल कीजिए।
छोड़ देवें छलकपट को मानसिक बल दीजिए।। 1।।

वेद की बोलें ऋचायें सत्य को धारण करें।
हर्ष में हों मग्न सारे शोक सागर से तरें।। 2।।

अश्वमेधादिक रचायें यज्ञ पर उपकार को।
धर्म मर्यादा चलाकर लाभ दें संसार को।। 3।।

नित्य श्रद्धा भक्ति से यज्ञादि हम करते रहें।
रोग पीड़ित विश्व के सन्ताप सब हरते रहें।। 4।।

भावना मिट जाये मन से पाप अत्याचार की।
कामनायें पूर्ण होंवे यज्ञ से नर नार की।। 5।।

लाभकारी हों हवन हर जीवधारी के लिए।
वायु जल सर्वत्र हों शुभ गन्ध को धारण किये।। 6।।

स्वार्थ भाव मिटे हमारा प्रेमपथ विस्तार हो।
इदन्नमम का सार्थक प्रत्येक में व्यवहार हो।। 7।।

प्रेमरस में तृप्त होकर वन्दना हम कर रहे।
नाथ करूणारूपकरूणा आपकी सब पर रहे।। 8।।

वन्दना (आरती)

(जय शरणं वरणं नमो नमः)

श्री मातेश्वरि जय त्रिपुरेश्वरि
राजेश्वरि जय नमो नमः।
करूणामयी सकल अध हारिणि
अमृत वर्षिणि नमो नमः।।

जय शरणं वरणं नमो नमः
श्री मातेश्वरि जय त्रिपुरेश्वरि....।
जय शरणं वरणं नमो नमः।।

अशुभ विनाशिनि, सब सुख दायिनी
खलदल नाशिनि नमो नमः।
भण्डासुर वधकारिणी जय माँ
करूणा कलिते नमो नमः।।

जय शरणं वरणं नमो नमः
श्री मातेश्वरि जय त्रिपुरेश्वरि.....।
जय शरणं वरणं नमो नमः।।

भव भय हारिणि कष्ट निवारिणि
शरणे गति दो नमो नमः
शिव भामिनि साधक मन हारिणि
आदि शक्ति जय नमो नमः।।

जय शरणं वरणं नमो नमः।
श्री मातेश्वरि जय त्रिपुरेश्वरि....।।
जय शरणं वरणं नमो नमः।।

श्री मातेश्वरि जय त्रिपुरेश्वरि....।
जय त्रिपुर सुन्दरी नमो नमः।
जय राजेश्वरि जय नमो नमः।।
जय ललितेश्वरि जय नमो नमः।

जय अमृत वर्षिणी नमो नमः।।
जय करूणा कलिते नमो नमः।।

श्री गुरुदेव की आरती

ओऽम जय गुरू बलिहारी, स्वामी जय गुरू बलिहारी।

जय जय मोह विनाशक, भव बन्धन हारी। ओऽम् जय गुरू ....

ब्रह्मा, विष्णु, सदाशिव, गुरू मूरत धारी। स्वामी गुरू.........

वेद, पुराण बखानी, गुरू महिमा भारी। ओऽम् जय गुरू...........

जप तप तीरथ संयम, दान विविध दीजे। स्वामी दान ....

गुरू बिन ज्ञान न होवे, कोटि जतन कीजे। ओऽम् जय गुरू............

माया मोह नदी में, जीव बहे सारे। स्वामी जीव ....

नाम जहाज बिठाकर, गुरू पल में तारे। ओऽम् जय गुरू............

काम, क्रोध, मद, मत्सर, चोर बड़े भारी। स्वामी चोर...........

ज्ञान खड्ग लेकर में गुरू सब संहारे। ओऽम् जय गुरू.........

नाना पन्थ जगत में, निज-निज गुण गावें। स्वामी निज.............

सब का सार बताकर, गुरू मारग लावे। ओऽम् जय गुरू.............

गुरू चरणामृत निर्मल, सब पातक हारी। स्वामी सब............

सुनत बचन तम नासे, सब संशय हारी। ओऽम जय गुरू............

तन मन धन सब अर्पण, गुरू चरनन कीजे। स्वामी जय गुरू..........

ब्रह्मानन्द परमपद, मोक्ष गति दीजे। ओऽम् जय गुरू............

लेखनी पूजा

कलम में मौली लपेटकर

ॐ शुल्कां ब्रह्मविचारसारपरमामाद्याजगत् व्यापिनीम्, वीणा पुस्तक धारिणी मभयदांजाड्यान्धकारापहाम्। हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्, वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्।। लेखिन्यै नमः।

कृष्णानने द्विजिह्वे च चित्रगुप्तकरास्थिते।
सदाक्षराणां पत्रे च लेख्यं कुरु सदा मम।।

आवाहये श्रीशारदां महाबुद्धिप्रदायिनीम्।
कार्तिस्या सितपक्षे पूजांगृहाण नमोऽस्तुते।।
ॐ प्रागदेवी सरस्वती वाजे भिर्वाजिनीवती।
यज्ञंवष्टु धियावसुः।।

ॐ वीणा पुस्तक धारिण्यै नमः। ॐ सरस्वत्यै नमः। ॐ विद्यायै नमः। ॐ वाग्वादिन्यै नमः। ॐ उद्बुद्धयै नमः। ॐ अपराजितायै नमः। ॐ श्रुत्यै नमः। ॐ विष्णु मायायै नमः। ॐ हिङ्गुलायै नमः। ॐ यज्ञविद्यायै नमः। ॐ सिद्धिदायै नमः। ॐ पद्मावत्यै नमः। ॐ भुवनेश्वर्यै नमः।।

साक्षात् सरस्वती देवीजिह्वाग्रे च वसंतिहि। सरस्वत्यै नमः।
महाविद्या महावाणी श्रुतिस्मृतिप्रदायिनी।।

द्रव्यनिधिस्थाने पूजन

ॐ कुबेराय नमः कुबेरमावाहयामि स्थापयामि।

इत्यावाह्य षोडशोपचारैः सम्पूज्य।।

ॐ धनदाय नमस्तुभ्यं निधि पद्माधिपाय च।

भवन्तु त्वत्प्रसादान्मे धन धान्यादि सम्पदः।।

दूरभाष पूजनं

ॐ दूरभाषाय नमः एतेगन्ध पुष्पे।

ॐ यन्तुर्यन्त्रणाग्ने स्वासाभ्राज्येनामिषिचामि दूरभाषाय नमः।।

तुलापूजनं

नमस्ते सर्वदेवानां शक्तित्वं सत्यमाश्रिता।

साक्षिभूता जगद्धात्री निर्मिता विश्व योनिना।।

ॐ तुला पुरुषाय नमः - इतिसम्पूज्य दक्षिण चेलकयोतर चेलकाय नमः।। ॐ ईशानाय नमः।। ॐ शशिने नमः।। ॐ मरुद्भ्यो नमः।। ॐ रुद्राय नमः।। ॐ सूर्याय नमः।। विश्वकर्मणे नमः।। ॐ गुरवे नमः।। ॐ अंगिरोग्निभ्यां नमः।। ॐ प्रजापतये नमः।। विश्वेभ्यो देवेभ्यो नमः।। ॐ सोमाय नमः।। ॐ अमृतराजाय नमः।। ॐ अश्विभ्यां नमः।। ॐ वरुणाय नमः।। ॐ मित्रावरुणाभ्यां नमः।। ॐ मरुद्भ्यो नमः।। ॐ धनेशाय नमः।। ॐ शर्वाय नमः।। ॐ जलेशाय नमः।। ॐ विष्णवे नमः।। ॐ गोविन्दाय नमः।। ॐ तुलापुरुषाय नमः।। ॐ गन्धादिभिसंपूजयेत्।।

एरावतसमारूढ़ो वज्र हस्तो महाबलः।

शतयज्ञाधियोदेव तस्मै इन्द्रायते नमः।।

लोहदण्डपूजनं

ॐ लोह दंडाय नमः एते गंध पुष्पे।।

दीपपूजनं

शुभं भवतु कल्याणमारोग्यं पुष्टिवर्द्धनम्।
आत्मतत्त्व प्रबोधाय दीपज्योतिर्नमोऽस्तु ते।।
सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणी।
पूजां गृहाण कौमारि! जगन्मातर्नमोऽस्तुते।।
गंधाक्षतपुष्पाणि समर्पयामि ॐ दिवाकराय नमः।
भो दीप त्वं ब्रह्म रूप अन्धकार निवारकः।
इमां मया कृतां पूजां गृहूणातेजप्रवर्धय।।
महालक्ष्म्यै नमः।।

प्रार्थना

नमस्ते देव देवेशि नमस्ते ईश्वरप्रिये।
नमस्ते सर्वदेवेशि नमस्ते शंकर प्रिये।।
यथा वैकुण्ठ नगरे यथैव क्षीर सागरे।
तथा मद्भवनेतिष्ठ लक्ष्मी विष्णुनासहा।।
विश्व रुपस्य भार्यासि पद्मेपद्मालये तथा।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्वमे।।
वर्षा काले महाधौरे यन्मया दुष्कृतं कृतम्।
सुखरात्रि प्रभातेऽद्य तन्मेलक्ष्मी व्यपोहतु।।
माता त्वं सर्वभूतानां देवानां सृष्टि संभवा।
आख्याता भूतलेदेवि सुखरात्रि नमोस्तुते।।
नमस्तेऽस्तु महालक्ष्मि महासौख्य प्रदायिनि।
सर्वदा देहिमे द्रव्यं दानाय मुक्तिहेतवे।।
धनधान्यधराँ हर्ष कीर्ति मायुर्यशः श्रियम तुरंगान्
दन्तिनः पुत्रान् महालक्ष्मि प्रयच्छम।।
यन्मया वांच्छितं देवि तत्सर्वंसर्वदा कुरु।
न बाध्यन्तां कुकर्माणि संकटान्मे निवारयं।
न्यूनं वाप्यतुलं वापियन्मयामोहितं कृतम्।
सर्वं तदस्तु सम्पूर्णं त्वत्प्रसादान्महेश्वरि।।

अथ देव्यपराधक्षमापनस्तोत्रम्

न मंत्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,
न चाह्वा नं ध्यानं तदपि च न जाने स्तुति कथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं,
परं जाने मातस्त्वदनुशरणं क्लेशहरणम्।। 1।।
विधेरज्ञानेन द्रविण बिरहेणालसतया,
विधेयाशक्यत्वात्तवचरणयोर्याच्युतिरभूत।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणी शिवे।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 2।।
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये बिरल तरलोऽहं तव सुतः।
मदीयोऽय त्यागः समुचितमिद नो तव शिवे।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 3।।
जगन्मातर्मातस्तव चरणसेवा न रचिता,
न वा दत्तं देवि द्रविणमपि भूयस्तव मया
तथापि त्वं स्नेहं मयि निरूपमं यत्प्रकुरुषे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 4।।
परित्यक्त्वा देवा विविध विधसेवाकुलतया,
मया पञ्चाशीतेरधिक़मुपनीते तु वयसि।
इदानीञ्चेन्मातस्तव यदि कृपा नापि भविता,
निरालम्बो लम्बोदर जननिकं यामि शरणाम्।। 5।।
श्वपाको जल्पाको भवति मधुपाकोपमगिरा,
निरातङ्को रङ्को बिहरति चिरं कोटि, कनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं,
जनः को जानीते जननि जपनीयं जपविधौ।। 6।।
चिताभस्मालेपो गरलमशन दिक्पटधरो,

जटाधारी कंठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं,
भवानी त्वत्पाणिग्रहण पारिपाटी फलमिदम्।। 7।।
न मोक्षस्याकांक्षा भवविभव बांछापि च नमे
न विज्ञानपेक्षा शशिमुखिसुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जनन यातु मम वै,
मूडानी रुद्राणी शिव शिव भवानीति जपतः।। 8।।
नाराधितासि' विधिना विविधोपचारैः,
किं रूक्षचिन्तनपरैर्नकृतं वचोभिः।
श्यामे त्वमेव यदि किंचन मय्यनाथे,
धरसे कृपामुचितमम्ब पर तवैव।। 9।।
आपत्सु मग्नः स्मरणं त्वदीयं,
करोमि दुर्गे करुणार्ण वेशि, नैतच्छठत्वं ममभाव येथा,
क्षुधातृषार्ताः जननीं स्मरन्ति।। 10।।
जगदम्वविचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयी,
अपराधपरंपरावृतं नहि माता समुपेक्षतेसुतम्।। 11।।
मत्समः पातकी नास्ति पापध्नी त्वत्समानहि।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु।। 12।।

महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।
शङ्ख चक्र गदा हस्ते महालक्ष्मि नमोऽस्तुते।।1।।

नमस्ते गरुडारुढे कालासुर भयंकरि।
सर्वपाप हरे देवि महालक्ष्मि नमोऽस्तुते।। 2।।

सर्वज्ञे सर्ववरदे सर्वदुष्ट भयङ्करि।
सर्व दुःख हरे देवि महालक्ष्मि नमोऽस्तुते।। 3।।

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि।
मन्त्र पूते सदा देवि महालक्ष्मि नमोऽस्तुते।। 4।।

आद्यन्त रहिते देवि आद्य शक्ति महेश्वरि।
योगजे योग सम्भूते महालक्ष्मि नमोऽस्तुते।। 5।।

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे।
महा पाप हरे देवि महालक्ष्मि नमोऽस्तुते।। 6।।

पद्मासनस्थिते देवि पर ब्रह्म स्वरुपिणि।
परमेशि जगन्मातः महालक्ष्मि नमोऽस्तुते।। 7।।

श्वेताम्बरधरे देवि नानालङ्कारभूषिते।
जगत्स्थितेजगन्मातः महालक्ष्मि नमोऽस्तुते।। 8।।

महालक्ष्म्यष्टकं स्त्रोत्रं यः पठेत्भक्तिमांन्नरः।
सर्व सिद्धि मवाप्नोति राज्यं प्राप्नोति सर्वदा।। 9।।

एक कालं पठेन्नित्यं महापापविनाशनम्।
द्विकालं यः पठेन्नित्यं धनधान्य समन्वितः।। 10।।

त्रिकालंयः पठेन्नित्यं महाशत्रु विनाशनम्।
महालक्ष्मी भिवेन्नित्यं प्रसन्ना वरदाशुभाः।। 11।।

आरतियां

ॐ जय लक्ष्मी माता, मैया जय लक्ष्मी माता
तुमको निशिदिन सेवत, हर विष्णु विधाता।।
उमा रमा ब्रह्माणी, तुम ही जग-माता।
सूर्य चन्द्रमा ध्यावत, नारद ऋषि गाता।।
जो कोई तुमको ध्याता, ऋद्धि-सिद्धि पाता।
तुम पाताल निवासिनि, तुम ही शुभ दाता।।
कर्म-प्रभाव-प्रकाशिनि, भवनिधि की त्राता।
जिस घर में तुम रहतीं, सब सद्गुण आता।।
सब संभव हो जाता, मन नहीं घबराता।।
तुम बिन यज्ञ न होवे, वस्त्र न कोई पाता।
खान-पान का वैभव, सब तुमसे आता।।
शुभगुण मंदिर सुंदर, क्षीरोदधि-जाता।
रत्न चतुर्दश तुम बिन, कोई नहीं पाता।।
महालक्ष्मी जी की आरती, जो कोई नर गाता।
उर आनंद समाता, पाप उतर जाता।।
स्थिर चर जगत बचाये शुभ कर्म नर लाता।
राम प्रताप मैया की शुभ दृष्टि चाहता।।

आरती श्री अम्बे जी

हे सिंहवाहिनी जगदम्बे तेरा ही एक सहारा है।
मेरी विपदाएं दूर करो करूणा दृष्टि इस ओर करो।
संकट के बीच घिरा हूँ मां आशा मैं तुम्हें पुकारा है।। हे.।।
कुमकुम अक्षत और पुष्पों से नैवेद्य धूप और अर्चन से,
नित तुम्हैं रिझाया करता हूँ क्यों अब तक नहीं निहारा है।। हे.।।
भव बाधायें हरने वाली जन जन की बाधा हरती हो।
मेरी बाधायें भी हरना जग जननी काम तुम्हारा है।। हे.।।
जब जब मानव पर कष्ट पड़े तब-तब तुमने अवतार लिया।
हे कल्याणी हे रूद्राणि रूप तुम्हारा है।। हे.।।
कौमारी सरस्वती हो तुम वैष्णवी तुम्हीं ब्रहाणी हो।
कर शंख चक्र और गदा लिये लक्ष्मी भी रूप तुम्हारा है।। हे.।।
मधु कैटभ सा दानव मारा और चंड मुन्ड को चूर किया।
हे माहेश्वरी महामाया चामुण्डा रूप तुम्हारा है।। हे.।।
धूम्र लोचन को तुमने मारा महिषासुर तुमने संहारा।
सिंहवाहिनी अष्टभुजी नव दुर्गा रूप तुम्हारा है।। हे.।।
था शुम्भानिशुम्भ असुर मारा और रक्तबीज का रक्त पिया।
हे शिव दूती हे गौरी मां काली भी रूप तुम्हारा है।। हे.।।
जब वैश्य सुरथ ने तप करके अपना तन तुम्हे चढ़ाया था।
दर्शन दे जीवन दान दिया ज्योतिर्मय रूप तुम्हारा है।। हे.।।
तेरी शरणागत में आकर तेरी ही महिला को भाकर।
मां सप्त शती के मन्त्रों से भक्तों ने तुम्हें पुकारा है।
हे सिंह वाहिनी जगदम्बे, तेरा ही एक सहारा है।।

डा० वी. के. शर्मा

पंडित अजय शर्मा भारतीय, सुपुत्र-श्री वी.के.शर्मा भारतीय,
सुपौत्र-गुरुदेव जितेन्द्र चन्द्र भारतीय से
ज्योतिर्विज्ञान/वास्तुशास्त्र/मन्त्रों द्वारा
अरिष्ट निवारण आदि की जानकारी हेतु संपर्क करें :

गुरु भारतीय आश्रम
गोदानिकुन्ज, सी-1065, सेक्टर-बी,
महानगर, लखनऊ-226 006
मो. 9450397741

- श्री विद्या उपासकों हेतु अमृतकलश
- योग व साधना मार्ग में निःश्रेयस सिद्धि प्रदान करने का साधन
- गृहस्थ उपासकों को सदगृहस्थ बनाने का अद्भुत साधन
- आत्मोद्धारकों हेतु

"सारस्वत कुण्डलिनी महायोग"

गुरुदेव डा० जितेन्द्र चन्द्र भारतीय का साधना प्रसून